# pArshvAbhyudayam

# પાર્શ્વાભ્યુદયમ્

## Document Information

Text title : pArshvAbhyudayam Narrating the life of the 23rd Tirthankara Lord PArshvanAtha

File name : pArshvAbhyudayam.itx

Category : major_works, jaina

Location : doc_z_misc_major_works

Author : AchArya Jinasena

Description/comments : Narrating the life of the 23rd Tirthankara Lord PArshvanAtha using meghadUta

Latest update : August 1, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# pAArshvAbhyudayam

# પાર્શ્વાભ્યુદયમ્

"pArshvAbhyudayam" meghadUtaveShTita kAvyaM
by AchArya jinasena

Jinasena was a ninth century Digambara Jain monk, best known for his work "Adi purANa". Very little is known about his personal life. Jinasena is also well-known in the sanskrit poetic literature for his work, pArshvAbhyudayam" (The Arising of pArshva), which he wrote before 783 AD. This work is about the life story of the 23rd Jain Saint PArshvanAtha, and the troubles created by SambarAsura, the brother of the former birth of PArshva.

In his work, "PArshvAbhyudayam" Jinasena has performed the wonderful feat of utilising each line of the love poem "MeghadUtam" of KAlidAsa for narrating the life of the 23rd Tirthankara Lord PArshvanAtha. The whole work of MeghadUtam is incorporated in this work, and the simple story of MeghadUtam is altogether changed and the incident of Parshav's harassment caused by Sambara is narrated in a very scholarly manner. What sets this work apart from other similar biographies is that the author ingeniously incorporated "each" of the 480 line from "every" one of the 120 shloka-s of "MeghadUtam", in the form of a "samasyA pUrana" exercise. Since the conventions of a Samasya Purana requires that the adopted text not to be changed, scholars feel that this work reflects the authentic version of KAlidAsa's MeghadUtam vogue during his period. (Ref: K B Pathak: KAlidAsa's MeghadUtam (as embodied in the PArshvAbhyudayam).

The poetical metre of this work is, of course, mandAkrAntA, as is expected. This poetic work PArshvAbhyudayam consisting of 364 shloka-s in chaste sanskrit. While most of the shloka-s employ the fourth line as the samasyA from KAlidAsa's MeghadUtam, some shloka-s have used the first or second or third line from KAlidAsa, and in several instances, two lines are taken from KAlidAsa's MeghadUtam.
The 364 shloka-s are distributed in four Sargas: Sarga 1 - 118, Sarga 2 - 118, Sarga 3 -

57, Sarga 4 - 71. But the last six shloka-s (in Sarga 4) do not use lines from KAlidAsa, and employ metre different from MandAkrAntA, and are the author's concluding remarks. So, the work uses KAlidAsa's lines only in 358 shloka-s. Among these, Jinasena uses one line of MeghadUtam in 246 shloka-s, and two lines of Meghadutam in 117 (= 234 lines), thus totalling 480 lines of all 120 shloka-s of MeghadUtam that are found in all standard editions of MeghadUtam.

It is not clear why all these 4 sargas have the same name: bhagavatkaivalyavarNanaM, as mentioned in this commentary of this work.

Reference:
shrIjinasenAchAryavirachitaM pArshvAbhyudayam (bhAratIya shruti-darshana kendra, jayapura) 1965 (843 pages), with a commentary in Sanskrit, BAlabodhini, written by Muktendu Varma.

NOTE: Since the ordering of varuious shloka-s in MeghadUtam differ from book to book, and also there are many prakShipta shloka-s scattered here and there in many editions, for the sake of a uniform numbering of the variouis lines of MeghadUtam that appears in this present work, I have used the following text as a basis.
"Complete Works of Kalidasa", edited by V P Joshi and published by E T Brill, Leiden, Netherlands (1976)
Hence all numberings such as (Megha 32c) refer to shlokams in this book, the letters a,b,c,d indicating the pAda number in each shloka.

ADDITIONAL NOTE:
There is a smaller work of the same flavour, "MeghadUta shlokamslekhaH" of Meghavijaya. In this Jain work, the author is sending a message to his Jain Guru through Megha. He has taken 4th line of each shloka of Kalidasa's MeghadUtam as a samasyA, and composed three more lines to complete the samasyA shloka-s, as a samasyA pUrana. Thus, the 4th line of each shlokam in both kAvyas are identical, though the stories are entirely different.

# પાર્શ્વાભ્યુદયમ્

## ॥ શ્રીપાર્શ્વાભ્યુદયમ્ ॥

॥ શ્રીજિનસેનાચાર્યવિરચિતમ્ ॥

## ॥ પ્રથમઃ સર્ગઃ ॥

શ્રીમન્મૂર્ત્યા મરકતમયસ્તમ્ભલક્ષ્મીં વહન્ત્યા
યોગૈકાગ્ન્યાસ્તિમિતતરયા તસ્થિવાંસં નિદધ્યૌ ।
પાર્શ્વં દૈત્યો નભસિ વિહરન્ બદ્ધવૈરેણ દગ્ધઃ
કશ્ચિત્ કાન્તાવિરહગુરુણા સ્વાધિકારાત્પ્રમત્તઃ ॥ ૧ ॥ (Megha 1a)

તન્માહાત્મ્યાત્સ્થિતવતિ સતિ સ્વેવિમાને સમાનઃ
પ્રેક્ષાગ્ચક્રેભ્રુકુટિવિષમં લબ્દસઞ્જ્ઞો વિભાગાત્ ।
જ્યાયાન્ભ્રાતુર્વિયુતપતિના પ્રાક્ કલત્રેણ યોઽભૂત્
શાપેનાસ્તઙ્ગમિતમહિમા વર્ષભોગ્યેણ ભર્તુઃ ॥ ૨ ॥ (Megha 1b)

યો નિર્ભત્સૈઃ પરમવિષમૈર્ઘાટિતો ભ્રાતરિ સ્વે
બદ્ધ્વા વૈરં કપટમનસા હા ! તપસ્વી તપસ્યામ્ ।
સિન્ધોસ્તીરે કલુષહરણે પુણ્યપણ્યેષુ લુબ્ધો
યક્ષશ્ચક્રે જનકતનયાસ્નાનપુણ્યોદકેષુ ॥ ૩ ॥ (Megha 1c)

તસ્યાસ્તીરે મુહુરુપલવાનૂર્ધ્વશોષં પ્રશુષ્યન્
ઉદ્બાહુસ્સન્ પરુષમનનઃ પઞ્ચતાપં તપો યઃ।
કુર્વન્ન સ્મ સ્મરતિ જડધીસ્તાપસાનાં મનોજ્ઞાં
સ્નિગ્ધચ્છાયાતરુષુ વસતિં રામગિર્યાશ્રમેષુ ॥ ૪॥ (Megha 1d)

યસ્મિન્ ગ્રાવા સ્થપુટિતતલો દાવદગ્ધાઃ પ્રદેશાઃ
શુષ્કા વૃક્ષા વિવિધવૃતયો નોપભોગ્યા ન ગમ્યાઃ ।
યઃ સ્મ ગ્રૈષ્માન્ નયતિ દિવસાઞ્શુષ્કવૈરાગ્યહેતોઃ

તસ્મિન્નદ્રૌ કતિચિદબલાવિપ્રયુક્તઃ સ કામી ॥ ૫॥ (Megha 2a)

યં ચાઽન્વિષ્યન્ વનમથ નદીમુત્તરારોહશૈલાન્
અત્યુદ્ભ્રાન્તાશ્ચિરમનુશયાદ્ભ્રાતૃભક્તઃ કનીયાન્ ।
શોકાદ્દેહે કદિચિદવશાદત્યનૂચાનવૃત્ત્યા
નીત્વા માસાન્ કનકવલયભ્રંશરિક્તપ્રકોષ્ઠઃ ॥૬॥ (Megha 2b)

યં ચાઽપશ્યદ્ગિરિવનનદીઃ પર્યટન્સોઽપિ કૃચ્છ્રાત્
અધ્વશ્રાન્તઃ કતિપયથકૈર્વાસરૈરદ્રિકુઞ્જે ।
દૂરાદ્ધૂમપ્રતતવપુષં નીલલેશ્યં યથોચ્ચૈઃ
આષાઢસ્ય પ્રથમદિવસે મેઘમાશ્લિષ્ટસાનુમ્ ॥ ૭॥ (Megha 2c) var પ્રશમદિવસે

યશ્ચાવદ્ધભ્રુકુટિકુટિલભ્રૂતટો જિહ્મવક્ત્રઃ
ક્રોધાવેશાજ્જ્વલદપઘનો ભ્રાતરં તં તદાનીમ્ ।
સ્નેહોદ્રેકાચ્ચરણપતિતં નાઽપદૃષ્ટિર્વિરૂક્ષં
વપ્રક્રીડાપરિણતગજપ્રેક્ષણીયં દદર્શ ॥ ૮॥ (Megha 2d)

સોઽસૌ જાલ્મઃ કપટહૃદયો દૈત્યપાશો હતાશઃ
સ્મૃત્વા વૈરં મુનિમપઘૃણો હન્તુકામો નિકામમ્ ।
ક્રોધાત્સ્ફૂર્જન્નવજલમુચઃ કાલિમાનં દધાનઃ
તસ્ય સ્થિત્વા કથમપિ પુરઃ કૌતુકાધાનહેતોઃ ॥ ૯॥ (Megha 3a) var કેતકાધાનહેતોઃ

કિઞ્ચિત્પશ્યન્મુનિપમનઘં સ્વાત્મયોગે નિવિષ્ટં
ગાઢાસૂયાં મનસિ નિદધત્તદ્વધોપાયમિચ્છન્ ।
ક્રૂરો મૃત્યુઃ સ્વયમિવ વહન્ સ્વેદબિન્દૂન્ સ રોષાત્
અન્તર્બાષ્પશ્ચિરમનુચરો રાજરાજસ્ય દધ્યૌ ॥ ૧૦॥ (Megha 3b)

મેઘૈસ્તાવત્સ્તનિતમુખરૈર્વિદ્યુદુદ્યોતહાસૈઃ
ચિત્તક્ષોભાન્દ્વિરદસદૃશૈરસ્ય કુર્વે નિકુર્વન્ ।
પશ્ચાચ્ચૈનં પ્રચલિતધૃતિં હી હનિષ્યામિ ચિત્રં
મેઘાલોકે ભવતિ સુખિનોઽપ્યન્યથાવૃત્તિ ચેતઃ ॥ ૧૧ ॥ (Megha 3c)

ધ્યાયન્નેવં મુનિપમભણીન્નિષ્ઠુરાલાપશૌણ્ડો
ભો ભો ભિક્ષો ભાણતુ સ ભવાન્ સ્વાન્તમન્તર્નિરુન્ધન્ ।
ક્ષીણાક્લેશે સિપિધુષિ મતિં કિં નિધત્તેઽઙ્ગિતત્વે
કણ્ઠાશ્લેષપ્રણયિનિ જને કિં પુનર્દૂરસંસ્થે ॥ ૧૨॥ (Megha 3d)

ઇત્યુક્ત્વાऽદો મુહુરુપવવહન્ નિશ્ચિતાત્મોપસર્ગો
બદ્ધક્રોધઃ સરભસમસૌ ભીમજીમૂતમાયામ્ ।
સ્રાગસ્રાક્ષીન્મુનિપમભિતો નોમનાગપ્યસૂરિઃ
પ્રત્યાસન્ને નભસિ દયિતાજીવિતાલમ્બનાર્થી ॥ ૧૩ ॥ (Megha 4a) var મનસિ, દયિતાજીવિતાલમ્બનાર્થાં,દયિતાજીવિતાલમ્બ

વિદ્યુન્માલાસ્ફુરિતરુચિરે મેઘજાતે નતાશે
સ્ફૂર્જદ્વજ્રે ઝટિતિ કમઠો વૃષ્ટિપાતં સસર્જ ।
કાલેનાऽસૌ કિલ જલભૃતાં યોગિનં તં વિતન્વન્
જીમૂતેન સ્વકુશલમયીં હારયિષ્યન્ પ્રવૃત્તિમ્ ॥ ૧૪ ॥ (Megha 4b)

એવં પ્રાયાં નિકૃતિમધમઃ કર્તુમારબ્ધ ભૂયો
માયાશીલશ્ચિરપરિચિતાદ્વૈરબન્ધાત્ પ્રકુપ્યન્ ।
સિદ્ધૈસ્તાન્નિષ્ક્રમણસમયે યોગિને ભક્તિનમ્રૈઃ
સ પ્રત્યગ્રૈઃ કુટજકુસુમૈઃ કલ્પિતાર્ઘાય તસ્મૈ ॥ ૧૫ ॥ (Megha 4c) var સમ્પ્રત્યગ્રૈઃ

પર્જન્યાનાં ધ્વનિમનુ સકઃ સ્ફાવયન્ સિંહનાદાન્
આક્રોશૈઃ સ્વૈર્મુનિપરિસરાત્ તર્જયન્નાશદૈત્યઃ ।
હા ધિઙ્ મૂઢ ભગવતિ મુનૌ પૂર્વબન્ધૌ ન ચોચ્ચૈઃ -
પ્રીતઃ પ્રીતિપ્રમુખવચનં સ્વાગતં વ્યાજહાર ॥ ૧૬ ॥ (Megha 4d)

ક્વાऽયં યોગી ભુવનમહિતો દુર્વિલઙ્ઘ્યસ્વશક્તિઃ
ક્વાऽસૌ ક્ષુદ્રઃ કમઠદનુજઃ ક્વેભરાજઃ ક્વ દંશઃ।
ક્વાऽऽસદ્ધ્યાનં ચિરપરિચિતધ્યેયમાકાલિકોऽસૌ
ધૂમજ્યોતિઃ સલિલમરુતાં સન્નિપાતઃ ક્વ મેઘઃ ॥ ૧૭ ॥ (Megha 5a)

ક્વાऽયં દેવો વિલસદણિમાદ્યષ્ટભેદસ્થિતર્દ્ધિઃ
ક્વાલ્પાર્દ્ધિત્વાદ્ગુરુસુરપશુઃ ક્વાદ્રિરાટ્ ક્વોપલૌઘઃ ।
ક્વાસ્યોદ્યોગઃ ક્વ નુ મુનિગુણો દુર્વિભેદાઃ ક્વ મૂકઃ
સન્દેશાર્થાઃ ક્વ પટુકરણૈઃ પ્રાણિભિઃ પ્રાપણીયાઃ ॥ ૧૮ ॥ (Megha 5b)

સત્યપ્યેવં પરિભવપથે યોજયન્ સ્વં દુરાત્મા
મત્યૌદ્ધત્યાત્ સ્વયમુપવહન્ વારિવાહચ્છલેન ।
માયાયુદ્ધં મુનિપમુપમાક્ષીણકો દુર્જયોऽયં
ઇત્યૌત્સુક્યાદપરિગણયન્ ગુહ્યકસ્તં યયાચે ॥ ૧૯॥ (Megha 5c)

જાતા રમ્યા સપદિ વિરલૈરિન્દ્રગોપૈસ્તદા ભૂઃ
સેવ્યા કેકિધ્વનિતમસુરા ભૂભૃતાં કુઞ્જદેશાઃ।

યોગી તસ્મિઞ્જલદસમયે પ્રાસ્ખલન્નાત્મધૈર્યાત્
કામાર્તા હિ પ્રકૃતિકૃપણાશ્ચેતનાચેતનેષુ ॥ ૨૦ ॥ (Megha 5d)

ઊર્ધ્વજ્ઞું તં મુનિમતિઘનૈઃ કાળમેઘૈઃ પ્રયુક્તો
ધારાસારો ભુવિ નમયિતું નાશકદ્ દુઃસહોઽપિ ।
જાત્યાશ્વાનામિવ બહુગુણે ભૂભૃતામુગ્રનામ્નાં
જાતં વંશે ભુવનવિદિતે પુષ્કરાવર્તકાનામ્ ॥ ૨૧ ॥ (Megha 6a)

ભૂયઃ ક્ષોભં ગમયિતુમનાઃ સ્વાન્તવૃત્તિં મુનીન્દો-
ર્વાચાટત્વં પ્રચિકટયિષુર્ધીરમેવં જજૃમ્ભે।
ભો ભો વીર સ્ફુટમિતિ ભવાણ્ મય્યગાદલ્પમૃત્યું
જાનામિ ત્વાં પ્રકૃતિપુરુષં કામરૂપં મઘોનઃ ॥ ૨૨ ॥ (Megha 6b)

યેનાઽમુષ્મિન્ભવજલનિધૌ પર્યટન્ નૈકધા માં
સ્ત્ર્યર્થેસ્ત્ર્યર્થેપરિભવપદં પ્રાપિપસ્ત્વં પ્રમત્તમ્ ।
કૃચ્છ્રાલ્લબ્ધે પુનરિતિ ચિરાદ્વૈરનિર્યાતનાયાં
તેનાઽર્થિત્વં ત્વયિ વિધિવશાદ્દૂરબન્ધુર્ગતોઽહમ્ ॥ ૨૩ ॥ (Megha 6c)

તસ્માદ્વીરપ્રથમગણનામામુકાસ્ત્વકં ચેત્
પૂર્વપ્રીત્યા સુભટ ! સફલાં પ્રાર્થનાં મે વિધત્સ્વ ।
કાલાદ્યાયેપરમપુરુષં ત્વાઽભિયાયાઽદ્ય યુદ્ધં
યાચ્ઞા મોઘા વરમધિગુણે નાધમે લબ્ધકામા ॥ ૨૪॥ (Megha 6d)

જેતું શક્તો યદિ ચ સમરે મામભીક પ્રહૃત્ય
સ્વર્ગસ્ત્રીણામભયસુભગં ભાવુકત્વં નિરસ્યન્ ।
પૃથ્વ્યા ભક્ત્યા ચિરમિહ વહન્ રાજયુદ્ધ્વેતિ રૂઢિં
સન્તપ્તાનાં ત્વમસિ શરણં તત્ પયોદપ્રિયાયાઃ ॥ ૨૫ ॥ (Megha 7a)

યાચેદેવં મદસિહતિભિઃ પ્રાપ્ય મૃત્યું નિકારાત્
મુક્તો વીરશ્રિયમનુભવ સ્વર્ગલોકેઽપ્સરોભિઃ।
નૈવં દાક્ષ્યં યદિ તવ તતઃ પ્રેષ્યતામેત્ય તૂર્ણીં
સન્દેશં મે હર ધનપતિક્રોધવિશ્લેષિતસ્ય ॥ ૨૬ ॥ (Megha 7b)

આદ્યઃ કલ્પસ્તવ ન સુકરો દુર્ઘટસ્ત્વાન્ન ચાન્ત્યઃ
શ્લાઘ્યો દૈન્યાન્મુનિમત તતો મધ્યકલ્પાશ્રયસ્તે।
શ્રેયાંસ્તસ્મિન્ સુખમનુભવેરપ્સરોભિસ્તદુચ્ચૈઃ
ગન્તવ્યા તે વસતિરલકા નામ યક્ષેશ્વરાણામ્ ॥ ૨૭ ॥ (Megha 7c)

યસ્યાં રાત્રેરપિ ચ વિગમે દમ્પતીનાં વિધત્તે
પ્રીતિં પ્રાતસ્તનનિધુવનગ્લાનિમુચ્ચૈર્હરન્તી ।
દૃષ્ટા સાસ્રં સતતવિરહોત્કણ્ઠિતૈશ્ચક્રવાકૈઃ
બાહ્યોદ્યાનસ્થિતહરશિરશ્ચન્દ્રિકા ધૌતહર્મ્યા ॥ ૨૮ ॥ (Megha 7d)

મત્તો મૃત્યું સમધિગતવાન્ યાસ્યસીષ્ટાં ગતીં તાં
યસ્મિન્ કાલે વિધુતસકલોપપ્લવસ્ત્વં સુખેન ।
દ્રષ્ટારોઽધોનિયમિતદૃશો દિવ્યયોષાસ્તતોષાઃ
ત્વામારૂઢં પવનપદવીમુદ્ગૃહીતાલકાન્તાઃ ॥ ૨૯ ॥ (Megha 8a)

દિવ્યે યાને ત્રિદિવવનિતાલિઙ્ગિતં વ્યોમમાર્ગે
સન્માણિક્યાભરણકિરણાદ્યોતિતાઙ્ગં તદાનીમ્ ।
ગાં ગચ્છન્દં નવજલધરાશઙ્કયાઽધઃ સ્થિતાસ્ત્વાં
પ્રેક્ષિષ્યન્તે પથિકવનિતાઃ પ્રત્યયાદાશ્વસન્ત્યઃ ॥ ૩૦ ॥ (Megha 8b)

સ્યાદાકૂતં મમ ન પુરતઃ સ્વસ્થવીરાગ્રણીર્યઃ
તિષ્ઠેદેકં ક્ષણમિતિ ન તં સામ્પ્રતં હન્તુમીશઃ।
નન્વેષોઽહં વદ ભટમતઃ કીર્તિલક્ષ્મીપ્રિયો વા
કઃ સન્નદ્ધે વિરહવિધુરાં ત્વય્યુપેક્ષેત જાયામ્ ॥ ૩૧ ॥ (Megha 8c)

શ્રુત્વાઽપ્યેવં બહુનિગતિતં જોપમેવાઽયમાસેત્
યોગીયોગાન્ન ચલતિતરાં પશ્ય ધીરત્વમસ્ય ।
સ્ત્રીમ્મન્યો વાભયપરવશઃ સોઽયમાસ્તે ધિગસ્તુ
ન સ્યાદન્યોઽપ્યહમિવ જનો યઃ પરાધીનવૃત્તિઃ ॥ ૩૨ ॥ (Megha 8d)

વિત્તનિઘ્નઃ સ્મરપવશાં વલ્લભાં કાઞ્ચિદેકાં
ધ્યાનવ્યાજાત્ સ્મરતિ રમણીં કામુકો નૂનમેષઃ ।
અજ્ઞાતં વા સ્મરતિ સુદતી યામયાદૂષિતાઽઽસીત્
તાં ચાઽવશ્યં દિવસગણનાતત્પરામેકપત્નીમ્ ॥ ૩૩ ॥ (Megha 9a)

જાનાસિ ત્વં પ્રથમવયસિ સ્વીકૃતાં તાં નવોઢાં
ત્યક્ત્વા યાસ્યસ્યવનિપતિના સાકમેકાકિનીં યન્ ।
પ્રત્યાવૃત્તઃ કથમપિ સતીં જીવિતં ધારયન્તી-
મવ્યાપન્નામવિહતગતિર્દ્રક્ષ્યસિ ભ્રાતૃજાયામ્ ॥ ૩૪ ॥ (Megha 9b)

ચિત્રં તન્મે યદુપયમનાનન્તરં વિપ્રયુક્તા

ત્વત્તઃ સાધ્વી સુરતરસિકા સા તદા જીવતિ સ્મ ।
મન્યે રક્ષત્યસુનિરસનાદ્ધાતુમાપદ્ગતાનાં
આશાબન્ધઃ કુસુમસદૃશં પ્રાયશો હ્યઙ્ગનાનામ્ ॥ ૩૫॥ (Megha 9c)

તચ્ચાશ્ચર્યં યદહમભજં ત્વદ્વિયોગેઽપિ કામાન્
પ્રાણૈરાર્તઃ કિમનુકુરુતે જીવલોકો હતાશઃ ।
પુંસાં ધૈર્યં કિમુદ સુહૃદાં કિં પુનઃસઙ્ગમાશા
સદ્યઃપાતિ પ્રણયિહૃદયં વિપ્રયોગે રુણદ્ધિ ?॥ ૩૬॥ (Megha 9d)

ઇત્યુક્ત્વાઽથો પુનરપિ સુરઃ સામભેદૌ વ્યતાનીત્
યોઽન્તઃસ્નેહસ્ત્વયિ ચિરમભૂત્પૂર્વબન્ધોસ્તદા મે ।
ધિક્કારસ્તં તિરયતિતરાં ત્વત્કૃતોઽસ્માન્ સ હન્તુમ્ ।
મન્દં મન્દં નુદતિ પવનશ્ચાનુકૂલો યથા ત્વામ્ ॥ ૩૭॥ (Megha 10a)

તસ્માદ્યોગં શિથિલય મુને દેહિ યુદ્ધક્ષણં મે
દાનાદન્યન્ન ખલુ સુકૃતં દેહિનાં શ્લાઘ્યમસ્તિ ।
શંસન્તીદં નનુ વનગજા દાનશીલાસ્તથાબ્દા
વામશ્ચાયં નદતિ મધુરં ચાતકસ્તે સગન્ધઃ ॥ ૩૮॥ (Megha 10b)

યુદ્ધે શૌણ્ડો યદિ ચ ભગવાન્ વીરશય્યાં શ્રિતઃ સ્યાઃ
સ્વર્ગસ્ત્રીણામહમહમિકાં સંવિધાસ્યંસ્તદા ત્વામ્ ।
વિદ્યાધર્યો નભસિ વૃણતે પુણ્યપાકાદ્વિનઙ્ક્ષ્ય-
દ્ગર્ભાધાનક્ષણપરિચયાન્નૂનમાબદ્ધમાલાઃ ॥ ૩૯॥ (Megha 10c)

મૂર્ચ્છાસુપ્તં ત્રિદશનિહિતામ્લાનમન્દારમાલં
તૂર્યધ્વાનસ્તનિતમુખરં દિવ્યયાનાધિરૂઢમ્ ।
દ્યામુદ્યન્તં સજલજલદાશઙ્કયાઽઽબદ્ધમાલાઃ
સેવિષ્યન્તે નયનસુભગં ખે ભવન્તં બલાકાઃ ॥ ૪૦ ॥ (Megha 10d)

યોગિન્ પશ્યંસ્ત્વદતુલધૃતેર્ભઙ્ગહેતૂન્ પયોદાં-
સ્તદ્ગમ્ભીરધ્વનિતમપિ ચ શ્રોતુમર્હસ્યકાલે।
કેકોદ્ગ્રીવાઞ્શિખરિષુ ચિરં નર્તયેયન્મયૂરાન્
કર્તું યચ્ચ પ્રભવતિ મહીમુચ્છિલીન્ધ્રામવન્ધ્યામ્ ॥ ૪૧॥ (Megha 11a)

પશ્યોત્ત્રસ્તા ધવલિતદિશો મન્દમન્દં પ્રયાન્તઃ
દૃશ્યન્તેઽમી ગગનમભિતો મન્દસાનાઃ સ્વનન્તઃ ।
બદ્ધોત્કણ્ઠોદ્વિગલિતમદાઃ પ્રાવૃષેણ્યામ્બુદાનાં

તચ્છ્રુત્વા તે શ્રવણસુભગં ગર્જિતં માનસોત્કાઃ ॥ ૪૨॥ (Megha 11b)

તે ચાડવશ્યં નવજલધરૈરુન્મનીભૂય હંસા
મત્પ્રામાણ્યાત્તવ જિગમિષોર્ધામ યક્ષેશ્વરાણામ્ ।
સઙ્ગચ્છન્તે પથિ જલમુચામાપતન્તઃ સમન્તાત્
આકૈલાસાદ્બિસકિસલયચ્છેદપાથેયવન્તઃ ॥ ૪૩॥ (Megha 11c)

સ્ફીતોત્કણ્ઠાવિગલિતમદા મન્દમન્દાયમાના
મૂકીભૂતાઃ સ્ખલિતગયોઽનુન્મુખાસ્સન્તતાશાઃ ।
ત્વામન્વેતે પવનપદવીમાશ્રયન્તોઽનુરૂપાઃ
સમ્પત્સ્યન્તે નભસિ ભવતો રાજહંસાઃ સહાયાઃ ॥ ૪૪॥ (Megha 11d)

ભોક્તું દિવ્યશ્રિયમનુમતાં યાતુકામો દ્યુલોકં
કાલક્ષેપદુપરમ રણે મઙ્ક્ષુ સન્નહ્ય ભિક્ષો ।
યેનાઽમુત્ર સ્પૃહયસિ દિવે યશ્ચ સંરક્ષતિ ત્વાં
આપૃચ્છસ્વ પ્રિયસખમમું તુઙ્ગમાલિઙ્ગ્ય શૈલમ્ ॥ ૪૫॥ (Megha 12a)

ભૂયશ્ચાનુસ્મર સિષિધુષઃ કાર્યસિદ્ધ્યૈ પ્રયત્ય
પ્રાયેણેષ્ટા મહતિ વિધુરે દેવતાનુસ્મૃતિર્નઃ ।
સિદ્ધિક્ષેત્રં શરણમથવા ગચ્છ તં રામશૈલં
વન્દ્યૈઃ પુંસાં રઘુપતિપદૈરઙ્કિતં મેખલાસુ ॥ ૪૬॥ (Megha 12b)

સ્નાતો ધૌતામ્બરનિવસનો દિવ્યગન્ધાનુલિપ્તઃ
સ્રગ્વી દન્તચ્છદવિરચિતારક્તતામ્બૂલરાગઃ ।
ખડ્ગી યુદ્ધે કૃતપરિકરઃ ક્ષાલિતાગઃપરાગઃ
કાલે કાલે ભવતિ ભવતો યસ્ય સંયોગમેત્ય ॥ ૪૭॥ (Megha 12c)

પશ્ચાત્તાપાદ્વ્યુપરિતમહો મય્યપિ પ્રીતિમેહિ
ભ્રાતઃ પ્રૌઢપ્રણયપુલકો માં નિગૂહ્ સ્વદોર્ભ્યામ્ ।
તત્તે સ્નિગ્ધે મયકિ જનિતતા શ્લાઘનીયા જનૈઃ સ્યાત્
સ્નેહવ્યક્તિશ્ચિરવિરહજં મુઞ્ચતો બાષ્પમુષ્ણમ્ ॥ ૪૮॥ (Megha 12d)

કિં વા વૈરીન્ધનદહિ મયિ પ્રૌઢમાનસ્ત્વમેત-
ન્નાભિપ્રેયાઃ કિમપરમહો નો વિલમ્બેન તિષ્ઠ ।
ત્વામદ્યૈવાન્તકમુખબિલં પ્રાપયામિ ત્વકં મે
માર્ગં મત્તઃ શ્રૃણુ કથયતસ્ત્વત્પ્રયાણાનુરૂપમ્ ॥ ૪૯॥ (Megha 13a) var* તાવચ્છૃણુ

શ્રેયોમાર્ગાન્ન હિ જિનમતાદ્ભ્રંશિતસ્યૈક એવ
માર્ગોઽસહ્યાદસુખવિષધેર્નારકાત્તારકો યઃ ।
તં મુક્ત્વા તે શ્રુતિસુખપદં વચ્મિ યત્ર પ્રિયાયાઃ
સન્દેશં મે તદનુ જલદ શ્રોષ્યસિ શ્રવ્યબન્ધમ્ ॥ ૫૦॥ (Megha 13b) var શ્રોત્રપેયમ્

તત્રાઽપ્યેકોઽનૃજુરૃજુરતઃ કોઽપિ પન્થાસ્તયોર્યો
વક્રોઽપિ ત્વા નયતિ સુખતસ્તં શ ृણુ પ્રોચ્યમાનમ્ ।
નાનાપુષ્પદ્રુમસુમનસાં સૌરભેણાતતેષુ
ખિન્નઃ ખિન્નઃ શિખરિષુ પદં ન્યસ્ય ગન્તાસિ યત્ર ॥ ૫૧॥ (Megha 13c)

યસ્મિન્ રમ્યાઃ કૃતકગિરયઃ સેવ્યસાનુપ્રદેશાઃ
નાનાવીરુદ્વિતતિસુભગાઃ પુષ્પશય્યાચિતાન્તાઃ ।
તેન વ્રજ્યા તવ સુખકરી તત્ર યાયાઃ સુખેન
ક્ષીણઃ ક્ષીણઃ પરિલઘુપયઃ સ્રોતસાં ચોપભુજ્ય ॥ ૫૨॥ (Megha 13d)

કામં યાયાઃ પથિ નિગદિતે કામગત્યા વિમાનં
પ્રીત્યારૂઢઃ પ્રથિતમહિમા વારિવાહીવ બન્ધો ।
દૃષ્ટોદ્યોગે નભસિ વિરહન્ ખેચરીભિસ્ત્વમુચ્ચૈ-
રદ્રેઃ શ ृઙ્ગં હરતિ પવનઃ કિંસ્વિદિત્યુન્મુખીભિઃ ॥ ૫૩॥ (Megha 14a)

મય્યામુક્તસ્ફુરિતકવચે નીલમેઘાયમાને
મન્યે યુક્તં મદનુકૃતયે વારિવાહાયિતં તે ।
મેઘીભૂતો વ્રજ લઘુ તતઃ પાતશઙ્કાકુલાભિઃ
દૃષ્ટોત્સાહશ્ચકિતચકિતં મુગ્ધસિદ્ધાઙ્ગનાભિઃ ॥ ૫૪॥ (Megha 14b)

તસ્માદ્વિદ્યુત્પ્રસવસમયે પ્રાપ્ય સિદ્ધિં વધૂનાં
સદ્યઃ કૃત્વા સમુચિતમદો દિવ્યજીમૂતરૂપમ્ ।
દિવ્યાન્ભોગાન્ સમનુભવિતું કામુકઃ કામચારે
સ્થાનાદસ્માત્સરસનિચુલાદુત્પતોદઙ્મુખઃ ખમ્ ॥ ૫૫॥ (Megha 14c)

દિગ્ભ્યો બિભ્યત્કથમિવ પુમાન્ ભીલુકસ્તત્ર ગચ્છે-
દુલ્લઙ્ઘ્યાદ્રીન્ વિષમસરિતો દુર્ગમાંશ્ચ પ્રદેશાન્ ।
તન્મા રોદીર્વ્રજ સુનિપુણં વ્યોમમાર્ગાનુસારી
દિઙ્નાગાનાં પથિ પરિહરન્ સ્થૂલહસ્તાવલેપાન્ ॥ ૫૬॥ (Megha 14d)

પ્રસ્થાને તે વિરચિતમિતસ્તોરણં નૂનમુચ્ચૈઃ
કાઞ્ચીદામ શ્લથિતમથવા સ્વર્ગલક્ષ્મ્યા કિમેતત્ ।

વર્ણોપઘ્નં ધનુરુત સમાવિર્ભવત્યત્યુદગ્રં
રત્નચ્છાયાવ્યતિકર ઇવ પ્રેક્ષ્યમેતત્પુરસ્તાત્ ॥ ૫૭॥ (Megha 15a)

નૂનં ભૂમ્યાન્તરિતવિસરં ભોગિમૂર્ધન્યરત્ન-
જ્યોતિશ્ચક્રં વિયતિ કિમિતો દૃશ્યતે ભૂમિરન્ધ્રાત્ ।
પ્રાયેણેદં દિનકરકરાશ્લિષ્ટમેઘાશ્રિતં યદ્-
વલ્મીકાગ્રાત્પ્રભવતિ ધનુઃ ખણ્ડમાખણ્ડલસ્ય ॥ ૫૮॥ (Megha 15b)

ખડ્ગસ્યૈકં કથમપિ દૃઢં મે સહસ્વ પ્રહારં
વક્ષોભાગે કુલિશકઠિને પ્રોચ્છલદ્રક્તધારમ્ ।
વિદ્યુદ્દણ્ડસ્ફુરિતરુચિના વારિદસ્યેવ ભૂયો
યેન શ્યામં વપુરતિતરાં કાન્તિમાપત્સ્યતે તે ॥ ૫૯॥ (Megha 15c)

શઙ્કોરેકં પ્રહૃતમથવા ધત્સ્વ શૂરાગ્રણિર્મે
પિચ્છોપાગ્રપ્રતતિરુચિરં યેન શોભાઽતિકા તે ।
ક્રીડાહેતોર્વિરચિતતનોરિન્દ્રનીલત્વિષઃ સ્યાદ્
બર્હેણેવ સ્ફુરિતરુચિના ગોપવેષસ્ય વિષ્ણોઃ ॥ ૬૦॥ (Megha 15d)

આસ્તાં તાવત્પ્રહરણકથા સ્વર્યયાઽર્જ્યં તવાઽયં
માર્ગઃ સ્વર્જો વિયદભિપતેઃ પ્રાગમુષ્માત્પ્રદેશાત્ ।
જીમૂતત્વં દધદનુગતઃ ક્ષેત્રિણાં દૃષ્ટિપાતૈઃ
ત્વય્યાયત્તં કૃષિફલમિતિ ભ્રૂવિલાસાનભિજ્ઞૈઃ ॥ ૬૧॥ (Megha 16a)

વિદ્યુન્માલાકૃતપરિકરો ભાસ્વદિન્દ્રાયુધશ્રી-
રુદ્યન્મન્દ્રસ્તનિતસુભગઃ સ્નિગ્ધનીલાઞ્જનાભઃ ।
શીઘ્રં યાયાઃ કૃતકજલદ ત્વત્પયોબિન્દુપાત-
પ્રીતિસ્નિગ્ધૈર્જનપદવધૂલોચનૈઃ પીયમાનઃ ॥ ૬૨॥ (Megha 16b)

દૃશ્યાન્દેશાઞ્જલદ સકલાન્પ્રેક્ષ્ય સિંહાવલોકાત્-
તત્રત્યાનાં જનપદભુવાં તાપમાહૃત્ય પશ્ચાત્ ।
પ્રીત્યાસન્નં જનપદમિમં લઙ્ઘયાલં વિલમ્બ્ય
સદ્યઃસીરોત્કષણસુરભિક્ષેત્રમારુહ્ય માલમ્ ॥ ૬૩॥ (Megha 16c)

યદ્યૌત્સુક્યં તવ જનપદપ્રેક્ષણે દીર્ઘકાલં
પ્રત્યાવૃત્તસ્વવિષયરતેરસ્તિ ભિક્ષો કદાચિત્ ।
તત્પેપીયસ્વ પરિસરિતં દક્ષિણાશાં ભ્રમિત્વા
કિઞ્ચિત્પશ્ચાદ્ વ્રજ લઘુગતિર્ભૂય એવોત્તરેણ ॥ ૬૪॥ (Megha 16d)

વક્ષ્યત્યુચ્ચૈઃ પથગતિપરિશ્રાન્તિતાન્તં નિતાન્તં
તુઙ્ગોઽદ્રિઃ સ્વૈર્બહુવિલસિતૈર્નિર્ઝરૈરાત્તકાન્તિઃ ।
પ્રત્યુદ્યાતો ધુતતટવનોપાન્તદેશૈર્મરુદ્ભિઃ
ત્વામાસારપ્રશમિતવનોપદ્રવં સાધુ મૂર્ધ્ના ॥ ૬૫॥ (Megha 17a) var વનોપપ્લવં

ત્વય્યાસન્ને વિરલવિરલાન્ પ્રાવૃષેણ્યોદબિન્દૂન્
વસ્ત્રક્નોપં વિસૃજતિ તથાઽપ્યશ્મવેશ્મોદરેષુ ।
સિદ્ધદ્વન્દ્વં સુરતરસિકં પ્રાન્તપર્યસ્તવીણં
વક્ષ્યત્યધ્વશ્રમપરિગતં સાનુમાનામ્રકૂટઃ ॥ ૬૬॥ (Megha 17b)

ત્વામુત્તુઙ્ગૈઃ શિખરતરુભિઃ સઙ્ગ્રહીષ્યત્યવશ્યં
વિશ્રાન્ત્યર્થં પ્રિયમુપગતં સોઽચલસ્તુઙ્ગવૃત્તિઃ।
પ્રાપ્તં કાલે પ્રણયિનમહો કર્તુમર્હત્યપાશં
ન ક્ષુદ્રોઽપિ પ્રથમસુકૃતાપેક્ષયા સંશ્રયાય ॥ ૬૭॥ (Megha 17c)

મન્યે મૈત્રીં ગુરુભિરચલૈર્વારિદાનામહાર્યા
યં પ્રત્યેતિ વિદધતિ ધૃતિં તસ્ય તે બન્ધુકૃત્યમ્ ।
કુર્યાદદ્રિર્ભૃશમસુહૃદોઽત્યુત્તમસ્નિગ્ધવૃત્તિઃ
પ્રાપ્તે મિત્રે ભવતિ વિમુખઃ કિં પુનર્યસ્તથોચ્ચૈઃ ॥ ૬૮॥ (Megha 17d)

સેવ્યઃ સોઽદ્રિઃ ખચરવનિતાધ્યાસિદોદગ્રશૃઙ્ગઃ
ત્વાં વિશ્રાન્ત્યૈ ત્વરયતિ પુરા રમ્યસાનુપ્રદેશઃ ।
સિદ્ધોપાસ્યઃ કુસુમિતલતાવીરુધાં સન્નિવેશ્યઃ
છન્નોપાન્તઃ પરિણતફલદ્યોતિભિઃ કાનનામ્રૈઃ ॥ ૬૯॥ (Megha 18a)

કૃષ્ણાહિઃ કિં વલયિતતનુર્મધ્યમસ્યાતિશેતે
કિં વા નીલોત્પલવિરચિતં શેખરં ભૂભૃતઃ સ્યાત્ ।
ઇત્યાશઙ્કાં જનયતિ પુરા મુગ્ધવિદ્યાધરીણાં
ત્વય્યારૂઢે શિખરમચલઃ સ્નિગ્ધવેણીસવર્ણે ॥ ૭૦॥ (Megha 18b)

અધ્યાસીનઃ ક્ષણમિવ ભવાનસ્ય શૈલસ્ય કુઞ્જં
લક્ષ્મીં રમ્યાં મુહુરુપહરન્નિદ્રનીલોપલસ્ય ।
ખેનોન્મુક્તો ભુવમિવ ગતઃ શ્લક્ષ્ણનિર્મોકખણ્ડો
નૂનં યાસ્યત્યમરમિથુનપ્રેક્ષણીયામવસ્થામ્ ॥ ૭૧॥ (Megha 18c)

ત્વય્યાનીલત્વિપિ ગિરિરસૌ શેખરત્વં દધાને

શોભામેષ્યત્યમરમિથુનશ્લાઘનીયાં તદાનીમ્ ।
નાનાપુષ્પદ્રુમશબલિતોપત્યકઃ સોતિમાત્રં
મધ્યે શ્યામઃ સ્તન ઇવ ભુવઃ શેષવિસ્તારપાણ્ડુઃ ॥ ૭૨॥ (Megha 18d)

રમ્યશ્રોણીર્વિકટદશનાઃ પ્રોથિનીર્દીર્ઘઘોણાઃ
પીનોત્તુઙ્ગસ્તનતટભરાન્મન્દમન્દં પ્રયાન્તીઃ।
ગ્રાવક્ષુણ્ણાપ્રશિથિલનખા વાજિવક્ત્રાઃ પ્રપશ્યે
તસ્મિન્ સ્થિત્વા વનચરવધૂભુક્તકુઞ્જે મુહૂર્તમ્ ॥ ૭૩॥ (Megha 19a) var સ્થિત્વા તસ્મિન્

તસ્માદદ્રેઃ કથમપિ ભવાન્મુક્તકુઞ્જઃ પ્રયાયાત્
રમ્યસ્થનં ત્યજતિ ન મનો દુર્વિધાનં પ્રતીહિ ।
કાલક્ષેપં વિસૃજ ગરિમાલમ્બનં યાહિ સદ્યઃ
તોયોત્સર્ગદ્રુતતરગતિસ્તત્પરં વર્ત્મ તીર્ણઃ ॥ ૭૪॥ (Megha 19b)

ગત્વોદીચીં ભુવ ઇવ પૃથું હારયષ્ટિં વિભક્તાં
વન્યેભાનાં રદનહતિભિર્ભિન્નપર્યન્તવપ્રામ્ ।
વીનાં વૃન્દૈર્મધુરવિરુતૈરાત્તતીરોપસેવાં
રેવાં દ્રક્ષ્યસ્યુપલવિષમે વિન્ધ્યપાદે વિશીર્ણામ્ ॥ ૭૫॥ (Megha 19c)

તાં તસ્યાદ્રેરુપતટવનં વિપ્રકીર્ણપ્રવાહાં
તીરોપાન્તસ્ખલનવિષમોદ્વૃત્તફેનાં સમીનામ્ ।
પશ્ય પ્રીત્યા ગિરિતટગજક્ષોભભિન્નોર્મિમાલાં
ભક્તિચ્છેદૈરિવ વિરચિતાં ભૂતિમઙ્ગે ગજસ્ય ॥ ૭૬॥ (Megha 19d)

દત્તં વન્યૈરિવ કલભકૈઃ પુષ્કરેણોત્ક્ષિપદ્ભિઃ
પ્રાયોગ્યં તે મુનિમત ચિરં વાસનાવાસિતસ્ય ।
ગ્રાવચ્ચુણ્ણોચ્ચલિતમથવા ત્વં હરેર્વાર્યવાર્ય
યસ્યાસ્તિક્તૈર્વનગજમદૈર્વાસિતં વાન્તવૃષ્ટિઃ ॥ ૭૭॥ (Megha 20a) var તસ્યાસ્તિક્તૈઃ

તત્સ્વાદીયઃ સુરભિ શિશિરં પ્રાર્થનીયં મુનીનાં
નિર્જન્તુત્વાદુપલનિપતન્નિર્ઝરામ્ભઃપ્રકાશમ્ ।
તસ્યાઃ ક્ષુણ્ણં વનકરિકરાઘટ્ટનૈરપ્યજસ્રં
જમ્બૂકુઞ્જપ્રતિહતરયં તોયમાદાય ગચ્છેઃ॥ ૭૮॥ (Megha 20b)

હૃત્વા તસ્યા રસમપહૃતાશેષમાર્ગશ્રમસ્ત્વં
વ્યોમવ્રજ્યાં પુનરવિહતપ્રક્રમાં સન્દધીથાઃ।
પ્રાપ્તસ્થૈર્યં સપદિ જલવાનપ્યસૌ યદ્ગરીયાન્

અન્તઃસારં ઘન તુલયિતું નાઽનિલઃ શક્ષ્યતિ ત્વામ્ ॥ ૭૯॥ (Megha 20c)

માર્ગે માર્ગે પુનરપિ જલાન્યાહરેસ્ત્વં ધુનીનાં
યેન સ્થેમા ભવતિ ભવતો વીર દૂરં પ્રયાતઃ ।
ઉત્સૃજ્યાલં લઘિમઘટિતાં રિક્તતામેધિ પૂર્ણો
રિક્તઃ સર્વો ભવતિ હિ લઘુઃ પૂર્ણતા ગૌરવાય ॥ ૮૦॥ (Megha 20d)

કાર્યાલ્લિઙ્ગાત્ સ્વયમધિગતાત્ કારણસ્યાઽનુમાનં
રૂઢં યેષાં તદિયમભિમા ક્તરુપેતિ મન્યે ।
ત્વત્સાન્નિધ્યં યદનુમિમતે યોષિતઃ પ્રોષિતાનાં
નીપં દૃષ્ટ્વા હરિતકપિશં કેસરૈરર્ધરૂઢૈઃ ॥ ૮૧॥ (Megha 21a)

મધ્યેવિન્ધ્યં વનભુવમિયા યત્ર દૃષ્ટ્વા શિલીન્ધ્રાન્
અધ્યારૂઢાનનુવનમમી પર્વતીયા મનુષ્યાઃ ।
ત્વામાયાતં કલયિતુમલં ત્વત્પયોબિન્દુપાતૈઃ
આવિર્ભૂતપ્રથમમુકુલાઃ કન્દલીશ્ચાનુકચ્છમ્ ॥ ૮૨॥ (Megha 21b)

ત્વામાસન્નં સપદિ પથિકા જ્ઞાતુમર્હન્ત્યકાલે
શ્રુત્વા કેકાધ્વનિમનુવનં કેકિનામુન્મદાનામ્ ।
બર્હક્ષેપં નટિતમપિ ચ પ્રેક્ષ્ય તેષાં સલીલં
દગ્ધારણ્યેષ્વધિકસુરભિં ગન્ધમાઘ્રાય ચોર્વ્યાઃ ॥ ૮૩॥ (Megha 21c)

પુષ્પામોદૈરવિરલમમી સમ્પતન્તો વનાન્તે
બદ્ધૌત્સુક્યાત્ સરસવિદલત્કન્દલૈશ્ચાનુકુઞ્જમ્ ।
દગ્ધારણ્યસ્થલપરિમલૈશ્ચાનુકૃષ્ટા યથાસ્ત્વં
સારઙ્ગાસ્તે જલલવમુચઃ સૂચયિષ્યન્તિ માર્ગમ્ ॥ ૮૪॥ (Megha 21d)

ગમ્ભીરત્વં યદિદમધુના લક્ષ્યતે ધ્યાનહેતોઃ
સઙ્ક્ષોભાણાં વિરચનશતૈરપ્યધૃષ્યં મદીયૈઃ।
તદ્ દૃષ્ટ્વાઽહં તવ ઘનતયા માન્દ્યમેવાઽતિધૈર્યા-
દુત્પશ્યામિ દ્રુતમપિ સખે મત્પ્રિયાર્થં યિયાસોઃ ॥ ૮૫॥ (Megha 22a)

ભૂયશ્ચાહં નવજલધરાધૌતસાનુપ્રદેશે
નૃત્યત્કેકિધ્વનિમુખરિતે સ્વાગતં તન્વતીવ ।
પાદ્યં ચોચ્ચૈર્વહતિ શિરસા નિર્ઝરામ્ભોઽભિશઙ્કે
કાલક્ષેપં કકુભસુરભૌ પર્વતે પર્વતે તે ॥ ૮૬॥ (Megha 22b)

નિઃસઙ્ગોઽપિ વ્રજિતુમનલં તત્ર તત્ર ક્ષિતિધ્રે
લબ્ધાતિથ્યઃ પ્રિય ઇવ ભવાનુહ્યમાનઃ શિરોભિઃ।
અભ્યુદ્યાતૈસ્ત્વદુપગમનાદુન્મનીભૂય ભૂયઃ
શુક્લાપાઙ્ગૈઃ સજલનયનૈઃ સ્વાગતીકૃત્ય કેકાઃ ॥ ૮૭॥ (Megha 22c)

તસ્યોત્કણ્ઠાવિરુતિમુખરસ્યોત્પતિષ્ણોઃ કથઞ્ચિત્
પ્રત્યાસન્નત્વદુપગમનસ્યાઽન્તરાર્દ્રસ્વભાવે।
સ્નેહવ્યક્તિં ત્વયિ ઘનયતઃ કેકિવૃન્દસ્ય મન્યે
પ્રત્યુદ્યાતઃ કથમપિ ભવાન્ ગન્તુમાશુ વ્યવસ્યેત્ ॥ ૮૮॥ (Megha 22d)

વિન્ધ્યોપાન્તાત્તવ ગતવતો નાઽતિદૂરે દશાર્ણાઃ
રમ્યારામા નયનવિષયે સમ્પતિષ્યન્તિ સદ્યઃ।
ત્વત્સાન્નિધ્યાત્ કલુષિતપયઃપૂર્ણશાલેયવપ્રાઃ
પાણ્ડુચ્છાયોપવનવૃતયઃ કેતકૈઃ સૂચિભિન્નૈઃ ॥ ૮૯॥ (Megha 23a)

તેષામાવિષ્કૃતજલલવે ત્વય્યુપાસન્નવૃત્તૌ
સીમોદ્દેશા નયનસુભગાઃ સામિસંરૂઢસસ્યાઃ ।
સઞ્જાયેરન્નવપરિકરા મૂકપુંસ્કોકિલાશ્ચ
નીડારમ્ભૈર્ગૃહબલિભુજામાકુલગ્રામચૈત્યાઃ ॥ ૯૦॥ (Megha 23b)

ભૂયસ્તેષામુપવનભુવસ્તુઙ્ગશાખાગ્રધૃષ્ટ-
વ્યોમોત્સઙ્ગૈર્નિજતરુવરૈરાત્તશોભાઃ ફલાઢ્યાઃ ।
સમ્પદ્યેરન્વિવિધવિહગૈરાકુલા નીડકૃદ્ભિઃ
ત્વય્યાસન્ને પરિણતફલશ્યામજમ્બૂવનાન્તાઃ ॥ ૯૧॥ (Megha 23c)

ઇત્યભ્યર્ણે ભવતિ વિલસદ્વિદ્યુદુદ્દામહાસે
મુક્તાસારપ્રકટિતરવે કેકિનામુન્મદાનામ્ ।
નૃત્યારમ્ભં ઘટયતિ મુહુર્નૂનમુદ્ભૂતપક્ષાઃ
સમ્પત્સ્યન્તે કતિપયદિનસ્થાયિહંસા દશાર્ણાઃ ॥ ૯૨॥ (Megha 23d)

ગત્વા પશ્યેઃ પવનવિચલત્કેતુહસ્તૈરભીક્ષ્ણં
દૂરાદુચ્ચૈર્ભવનશિખરૈરાહ્વયન્તીમિવ ત્વામ્ ।
સાલોદગ્રાં શ્રિયમિવ ભુવો રૂપિણીં નાભિભૂતાં
તેષાં દિક્ષુ પ્રથિતવિદિશાલક્ષણાં રાજધાનીમ્ ॥ ૯૩॥ (Megha 24a)

સૌધોત્સઙ્ગે ક્ષણમુપનિષત્તૃષ્ણ તૂષ્ણીં નિષણ્ણો
જાલોદ્ગીર્ણૈઃ સુરભિતતનુર્ધૂપધૂમૈર્મનોજ્ઞૈઃ ।

વારસ્ત્રીણાં નિધુવનરતિં પ્રેક્ષમાણસ્ત્વમેનાં
ગત્વા સદ્યઃ ફલમપિ મહત્કામુકત્વસ્ય લબ્ધા ॥ ૯૪॥ (Megha 24b) var* ફલમવિકલં

વિશ્રાન્તિસ્તે સુભગ વિપુલા તત્ર યાતસ્ય મન્યે
કલ્હારાઢ્યં સુરભિ શિશિરં સ્વચ્છમુત્ફુલ્લપદ્મમ્ ।
વાતાકીર્ણૈઃ કુવલયદલૈર્વાસિતં દીર્ઘિકામ્ભઃ
તીરોપાન્તસ્તનિતસુભગં પાસ્યસિ સ્વાદુ યત્ર ॥ ૯૫॥ (Megha 24c) var યસ્માત્ , યત્તત્

પાતવ્યં તે રસિક સરસં પ્રાણયાત્રાનિમિત્તં
તસ્યાં લીલાસ્ફુરિતશફરાઘટ્ટનૈરાત્તપઙ્કમ્ ।
રોધઃપ્રાન્તે વિહગકલભૈર્બદ્ધડિણ્ડીરપિણ્ડં
સભ્રૂભઙ્ગં મુખમિવ પયો વેત્રવત્યાશ્ચલોર્મિ ॥ ૯૬॥ (Megha 24d)

પીત્વા તસ્યાં સલિલમમલં જીવિકાં કૃત્ય કિઞ્ચિત્
નીત્વાઽહસ્ત્વં ક્વચિદનુમતે હર્મ્યપૃષ્ઠેનિષણ્ણઃ ।
દૃષ્ટ્વા દૃશ્યં વિલસિતમદો નાગરાણાં દિનાન્તે
નીચૈરાખ્યં ગિરિમધિવસેસ્તત્ર વિશ્રાન્તિહેતોઃ ॥ ૯૭॥ (Megha 25a) var વિશ્રામહેતોઃ

ત્વં સેવેથાઃ શિખરિણમમું તાં નિશાં મુક્તશઙ્કો
વિદ્યુદ્દામસ્ફુરિતરુચિમદ્દીપિકાદ્યોતિતાશઃ।
સિદ્ધસ્ત્રીણાં રતિપરિમલૈર્વાસિતાધિત્યકાન્તં
ત્વત્સમ્પર્કાત્પુલકિતમિવ પ્રૌઢપુષ્પૈઃ કદમ્બૈઃ ॥ ૯૮॥ (Megha 25b)

સોઽસાવદ્રિર્ભવતુ નિતરાં પ્રીતયે તે સમગ્ર-
ગ્રાવોપાગ્રૈર્ગ્રહગણમિવોપગૃહીતું ખમુદ્યન્ ।
ભોગેદ્રેકં કથયતિ લતાવેશ્મકૈઃ સોપહારૈઃ
યઃ પણ્યસ્ત્રીરતિપરિમલોદ્ગારિભિર્નાગરાણામ્ ॥ ૯૯॥ (Megha 25c)

પ્રેમાઽમુષ્મિંસ્તવ સમુચિતં વિદ્ધિ શૈલે શિલાગ્રૈઃ
વ્યોમોત્સઙ્ગં પરિમૃજતિ વા પુશય્યાચિતાન્તૈઃ।
સ્રસ્તસ્રગ્ભિર્નિધુવનવિધૌ ક્રીડતાં દમ્પતીનાં
ઉદ્દામાનિ પ્રથયતિ શિલાવેશ્મભિર્યૌવનાનિ ॥ ૧૦૦॥ (Megha 25d)

રમ્યોત્સઙ્ગે શિખરનિપતન્નિર્ઝરારાવહૃદ્યે
પર્યારૂઢદ્રુમપરિગતોપત્યકે તત્ર શૈલે ।
વિશ્રાન્તઃ સન્વ્રજ વનનદીતીરજાનાં નિષિઞ્ચ- (Megha 26a) var* તીરજાતાનિ સિઞ્ચન્
ન્નુદ્યાનાનાં નવજલકણૈર્યૂથિકાજાલકાનિ ॥ ૧૦૧॥ (Megha 26b)

અધ્યારૂઢેતપતિ તપને પુષ્પગુલ્માવકીર્ણા
તસ્યાસ્તીરક્ષિતિમતિપતેર્નાતિવેગાદ્દયાલુ: ।
ગણ્ડસ્વેદાપનયનરુજાક્લાન્તકર્ણોત્પલાનાં (Megha 26c)
છાયાદાનાત્ક્ષણપરિચિતઃ પુષ્પલાવીમુખાનામ્ ॥ ૧૦૨॥ (Megha 26d)

વક્રોડપ્યધ્વા જગતિ સ મતો યત્ર લાભોડસ્ત્યપૂર્વો
યાતું શક્યં નનુ વનપથાત્ કાસિકાગ્રાર્જુનાન્તાત્ ।
વક્રઃ પન્થા યદપિ ભવતઃ પ્રસ્થિતસ્યોત્તરાશાં (Megha 27a)
સૌધોત્સઙ્ગપ્રણયવિમુખો મા સ્મ ભૂરુજ્જયિન્યાઃ ॥ ૧૦૩॥ (Megha 27b)

જૈત્રૈર્બાણૈઃ કુસુમધનુષો દૂરપાતૈરમોઘૈઃ
મર્માવિદ્ભિર્દૃઢપરિચિતભ્રૂધનુર્યષ્ટિમુક્તૈઃ ।
વિદ્યુદ્દામસ્ફુરિતચકિતૈર્યત્ર પૌરાઙ્ગનાનાં (Megha 27c) var ચકિતૈસ્તત્ર
લોલાપાઙ્ગૈર્યદિ ન રમસે લોચનૈર્વઞ્ચિતઃ સ્યાઃ ॥ ૧૦૪॥ (Megha 27d) var લોચનૈર્વઞ્ચિતોડસિ

સ્રોતઃ પશ્યન્ વ્રજ પથિ લુઠન્મીનલોલાયતાક્ષ્યાઃ
નિર્વિન્ધ્યાયાઃ કિમપિ કિમપિ વ્યઞ્જિતાકૂતવૃત્તિઃ।
વીચિક્ષોભસ્તનિતવિહગશ્રેણિકાઞ્ચીગુણાયાઃ (Megha 28a)
સંસર્પન્ત્યાઃ સ્ખલિતસુભગં દર્શિતાવર્તનાભેઃ ॥ ૧૦૫॥ (Megha 28b)

ત્વય્યૌત્સુક્યં સ્ફુટમિવ વિનાડપ્યક્ષરૈર્વ્યઞ્જયન્ત્યાઃ
કિઞ્ચિલ્લજ્જાવલિતમિવ સન્દર્શિતાત્માગમાયાઃ ।
નિર્વિન્ધ્યાયાઃ પથિ ભવ રસાભ્યન્તરઃ સન્નિપત્ય (Megha 28c)
સ્ત્રીણામાદ્યં પ્રણયવચનં વિભ્રમો હિ પ્રિયેષુ ॥ ૧૦૬॥ (Megha 28d)

હંસશ્રેણીકલવિરુતિભિસ્ત્વામિવોપાહ્વયન્તી
ધૃષ્ટા માર્ગે શિથિલવસનેવાઙ્ગના દૃશ્યતે તે ।
વેણીભૂતપ્રતનુસલિલા તામતીતસ્ય સિન્ધુઃ (Megha 29a) var સાવતીતસ્ય
પાણ્ડુચ્છાયાતટરુહતરુભ્રંશિભિર્જીર્ણપર્ણૈઃ ॥ ૧૦૭॥ (Megha 29b)

ક્ષામાડડપાણ્ડુઃ પ્રતનુસલિલા વેણિકાં ધારયન્તી
હંસસ્વાનૈરિવ વિદધતી પ્રાર્થનાચાટુમેષા ।
સૌભાગ્યં તે સુભગ ! વિરહાવસ્થયા વ્યઞ્જયન્તી (Megha 29c)
કાર્શ્યં યેન ત્યજતિ વિધિના સ ત્વયૈવોપપાદ્યઃ ॥ ૧૦૮॥ (Megha 29d)

સત્યપ્યેવં પથિ બહુવિધે સંવિધાનાનુષઙ્ગે

મુખ્યસ્વાર્થપ્રતિહતિભયાદાશુ ગત્વાઽધ્વશેષમ્ ।
પ્રાપ્યાવન્તીનુદયનકથાકોવિદગ્રામવૃદ્ધાન્ (Megha 30a)
પૂર્વોદ્દિષ્ટામનુસર પુરીં શ્રીવિશાલાં વિશાલામ્ ॥ ૧૦૯॥ (Megha 30b)

વ્યાવર્ણ્યાલં ભુવનમહિતાં તાં પુરીમુત્તમાર્દ્ધિં
લક્ષ્મ્યાઃ શશ્વન્નિવસનભુવં સમ્પદામેકસૂતિમ્ ।
સ્વલ્પીભૂતે સુચરિતફલે સ્વર્ગિણાં ગાં ગતાનાં (Megha 30c)
શેષૈઃ પુણ્યૈર્હૃતમિવ દિવઃ કાન્તિમત્ખણ્ડમેકમ્ ॥ ૧૧૦॥ (Megha 30d)

યસ્યામુચ્ચૈરુપવનતરૂન્નામયન્માતરિશ્વા
વીચીક્ષોભાદધિકશિશિરઃ સઞ્ચરત્યપ્કણૌઘૈઃ ।
દીર્ઘીકુર્વન્પટુ મદકલં કૂજિતં સારસાનાં (Megha 31a)
પ્રત્યૂષેષુ સ્ફુટિતકમલામોદમૈત્રીકષાયઃ ॥ ૧૧૧॥ (Megha 31b)

કલ્લોલાન્તર્વલનશિશિરઃ શીકરાસરવાહી
ધૂતોદ્યાનો મદમધુલિહાં વ્યઞ્જયન્ સિઞ્ચિતાનિ ।
યત્ર સ્ત્રીણાં હરતિ સુરતગ્લાનિમઙ્ગાનુકૂલઃ (Megha 31c)
શિપ્રાવાતઃ પ્રિયતમ ઇવ પ્રાર્થનાચાટુકારઃ ॥ ૧૧૨॥ (Megha 31d) var સિપ્રાવાતઃ

તીક્ષ્ણસ્યાઽરેઃ સ કિલ કલહે યુદ્ધશૌણ્ડો મુરુણ્ડઃ
પ્રદ્યોતસ્ય પ્રિય ! દુહિતરં વત્સર્જોઽત્ર જહ્રે । (Megha 33a)
હૈમં તાલદ્રુમભવનમભૂદત્ર તસ્યૈવ રાજ્ઞ (Megha 33b)
હાસાલાપૈરિતિ રમયતિ સ્ત્રીજનો યત્ર બાલાન્ ॥ ૧૧૩॥

શૈલં શૈલપ્રમિતવપુષા પીડયન્નુન્મદિષ્ણૂન્
નિઘ્નન્ વ્યાલાન્ કુપિતસમવર્તીવ મેઘં મરુદ્ધત્ ।
અત્રોદ્ભ્રાન્તઃ કિલ નલગિરિઃ સ્તમ્ભમુત્પાટ્ય દર્પા- (Megha 33c)
દિત્યાગન્તૂન્ રમયતિ જનો યત્ર બન્ધૂનભિજ્ઞઃ ॥ ૧૧૪॥ (Megha 33d)

યસ્યાં બિભ્રત્યવનિપપથા રત્નરાશીનુદગ્રાગ્-
શૂર્પોન્મેયાઞ્જલધય ઇવાપીતતોયા યુગાન્તે ।
હારાંસ્તારાંસ્તરલગુટિકાન્કોટિશઃ શઙ્ખશુક્તીઃ (Megha 32a)
શષ્પશ્યામાન્મરકતમણીનુન્મયૂખપ્રરોહાન્ ॥ ૧૧૫॥ (Megha 32b)

ભૂયો નાનાભરણરચનાયોગ્યરત્નપ્રવેકાગ્-
જ્યોતિર્લેખારચિતરુચિમચ્છક્રચાપાનુકારાન્ ।
દૃષ્ટ્વા યસ્યા વિપણિરચિતાન્વિદ્રુમાણાં ચ ભઙ્ગાન્ (Megha 32c)

સંલક્ષ્યન્તે સલિલનિધયસ્તોયમાત્રાવશેષાઃ ॥ ૧૧૬॥ (Megha 32d)

વિશ્રમ્યોચ્ચૈર્વલભિષુ પુરીં પ્રાપ્ય તામુત્તમાર્દ્ધિ
સ્વર્ગાવાસપ્રણયમુરરીકૃત્ય સૌધૈસ્તથાઽસ્યાઃ ।
જાલોદ્ગીર્ણૈરુપચિતવપુઃ કેશસંસ્કારધૂપૈ- (Megha 34a)
ર્બન્ધુપ્રીત્યા ભવનશિખિભિર્દત્તનૃત્યોપહારઃ ॥ ૧૧૭॥ (Megha 34b)

સ્વઃસૌધેષુ પ્રણયમચિરાત્સંહરિષ્યસ્યવશ્યં
મન્દ્રાતોદ્યધ્વનિષુ સતતારબ્ધસઙ્ગીતકેષુ ।
હર્મ્યેષ્વસ્યાઃ કુસુમસુરભિષ્વધ્વખિન્નાન્તરાત્મા (Megha 34c) var કુસુમસુરભિષ્વધ્વખેદં નયેથા
નીત્વા ખેદં લલિતવનિતાપાદરાગાઙ્કિતેષુ ॥ ૧૧૮॥ (Megha 34d)
var નીત્વા રાત્રિં, લક્ષ્મીં પશ્યંલ્લલિતવનિતાપાદરાગાઙ્કિતેષુ

॥ ઇત્યમોઘવર્ષપરમેશ્વરપરમગુરુશ્રીજિનસેનચાર્યવિરચિતમેઘદૂતવેષ્ટિતે પાર્શ્વાભ્યુદયે ભગવત્કૈવલ્યવર્ણનં નામ પ્રથમઃ સર્ગઃ ॥

## ॥ અથ દ્વિતીયઃ સર્ગઃ ॥

વિશ્રમ્યાઽથ ક્ષણમિવ ભવાન્ પર્યતેત્સન્દિદૃક્ષુઃ
શોભાં તસ્યાં શતમખપુરીં હ્રેપયન્ત્યાઃ સ્વભૂત્યાઃ।
સ્નિગ્ધશ્યામં વપુરુપવહન્નાગરાણાં ફણાભૃ-
દ્ભર્તુઃ કણ્ઠચ્છવિરિતિ ગણૈઃ સાદરં વીક્ષ્યમાણઃ ॥ ૧ ॥ (Megha 35a)

પૂર્વં તાવદ્ધવલિતનભોભાગમભ્રંલિહાગ્રં
કૈલાસાદ્રિશ્રિયમિવ હસન્મોહશત્રોર્નિહન્તુઃ।
કર્મારીણાં વિજિતમદનસ્યાઽર્હતઃ સઞ્ચિચીષુઃ
પુણ્યં યાયાસ્ત્રિભુવનગુરોર્ધામ ચણ્ડીશ્વરસ્ય ॥ ૨ ॥ (Megha 35b)

તં સેવેથાઃ કૃતપરિગતિર્વ્યાકિરન્પુષ્પવર્ષં
સ્તોત્રીકુર્વન્ સ્તનિતમભિતો દુન્દુભિસ્વાનમન્દ્રમ્ ।
વાતોદ્ધૂતૈરનિભૃતતરૈરુત્તરઙ્ગૈઃ પયોભિ-
ર્ધૂતોદ્યાનં કુવલયરજોગન્ધિભિર્ગન્ધવત્યાઃ ॥ ૩ ॥ (Megha 35c)

સત્યન્યસ્મિન્ સુરભિશિશિરસ્વચ્છતોયહ્રદાદૌ
નાનાસ્વાદૌ પયસિ પવિતે પીતનસ્ત્વદ્વિનોદઃ ।
વ્યાધૂતૈસ્તૈઃ કથમિવ ભવેદ્વારિભિર્ગન્ધવત્યાઃ

તોયક્રીડાનિરતયુવતિસ્નાનતિક્તૈર્મરુદ્ભિઃ ॥ ૪॥ (Megha 35d)

દ્રષ્ટું વાઞ્છા યદિ ચ ભવતિ પ્રેતગોષ્ઠીં વિચિત્રાં
તિષ્ઠાતિષ્ઠન્નુપરિનિપતદ્ગૃધ્રવદ્ધાન્ધકારે ।
દોષામન્યેઽપ્યહનિ નિતરાં પ્રેતગોષ્ઠીતિ રાત્રે-
રપ્યન્યસ્મિઞ્જલધર ! મહાકાલમાસાદ્ય કાલે ॥ ૫ ॥ (Megha 36a)

તસ્માજ્જીર્ણદ્રુમશતબૃહત્કોટરાન્તઃપ્રબદ્ધ-
ધ્વાનોલૂકપ્રતિભયરવે પ્રેતશોફાતિરૌદ્રે ।
તસ્યોપાન્તે પરિણતશિવારબ્ધસાંરાવિણોગ્રે
સ્થાતવ્યં તે નયનવિષયં યાવદત્યેતિ ભાનુઃ ॥ ૬ ॥ (Megha 36b)

વિદ્યાસિદ્ધિં પ્રતિ નિયમિનો ધૌતવસ્ત્રસ્ય મન્ત્રૈ-
ર્હુંકુઙ્કારૈઃ પિતૃવનમભિ ભ્રામ્યતઃ સ્વૈર્વિરિબ્ધૈઃ।
પૂજામાપ્તાસ્યનઘમધુરૈઃ સાધકૌઘસ્ય તસ્મિન્
કુર્વન્ સન્ધ્યાબલિપટહતાં શૂલિનઃ શ્લાઘનીયામ્ ॥ ૭ ॥ (Megha 36c)

તત્રાઽસ્ત્યન્તર્વણમપભિયામાસિતં સન્મુનીનાં
જૈનં વેશ્મ સ્તુતિકલકલાદાત્તતન્નામરૂઢિ ।
તં સેવિત્વા સ્તનિતપટહૈરુચ્ચરદ્ભિસ્તમુચ્ચૈ-
રામન્દ્રાણાં ફલમવિકલં લપ્સ્યસે ગર્જિતાનામ્ ॥ ૮॥ (Megha 36d)

સાયાહ્ને ચેત્તદુપગતવાન્ ધામ તત્કાલપૂજા-
સઙ્ગીતાન્તે શ્રમજલકણૈરાચિતાઙ્ગીઃ સુકણ્ઠીઃ ।
મન્દં યાન્તીશ્ચતુરગણિકાઃ શીકરૈઃ સન્નયેસ્ત્વં
પાદન્યાસક્વણિતરસનાસ્તત્ર લીલાવધૂતૈ ॥ ૯ ॥ (Megha 37a) var પાદન્યાસૈઃ ક્વણિતરશના

તાસ્તત્રાહર્મણીમયરણન્નૂપુરાઃ પણ્યયોષાઃ
પ્રોદ્ગાયન્તીઃ સુલલિતપદન્યાસમુદ્ભ્રૂવિલાસાઃ ।
પશ્યોત્પશ્યા નવજલકણદ્વિત્રસિક્તા વિલોલા
રત્નચ્છાયાખચિતવલિભિશ્ચામરૈઃ ક્લાન્તહસ્તાઃ ॥ ૧૦ ॥ (Megha 37b)

ત્વાં તત્રાઽર્હદ્ભવનવલભેરૂર્ધ્વભાગે નિષણ્ણં
સન્ધ્યારાગચ્છુરિતવપુષં વિદ્યુદુદ્ભાસિદણ્ડમ્ ।
દ્રક્ષ્યન્તે તા વિરચિતમિવ વ્યોમ્નિ લીલાવિતાનં
વેશ્યાસ્ત્વત્તો નખપદસુખાન્ પ્રાપ્ય વર્ષાગ્રબિન્દૂન્ ॥ ૧૧ ॥ (Megha 37c)

ભૂયશ્ચ ત્વત્સ્તનિતચકિતાઃકિંસ્વિદિત્યાત્તશઙ્કાઃ
કિઞ્ચિત્તિર્યગ્વલિતવદનાસ્તત્ર પણ્યાઙ્ગનાસ્તાઃ ।
બદ્ધોત્કમ્પસ્તનતટલુઠલ્લોલહારાઃ સલીલાન્
આમોક્ષ્યન્તે ત્વયિ મધુકરશ્રેણિદીર્ઘાન્ કટાક્ષાન્ ॥ ૧૨॥ (Megha 37d)

ઇત્થં ભક્તિપ્રકટનપટુસ્તત્ર ચાતોદ્યગોષ્ઠીં
કૃત્વા મન્દ્રસ્તનિતમુરવધ્વાનમાવિર્વિતન્વન્ ।
વન્દારૂણાં શૃણુ સુનિભૃતઃ સ્તોત્રપાઠં મુનીનાં
પશ્ચાદુચ્ચૈર્ભુજતરુવનં મણ્ડલેનાઽભિ લીનઃ ॥ ૧૩ ॥ (Megha 38a) var મણ્ડલેનાભિલીનઃ

તસ્મિન્કાલે જલધરપથે સ્વં વિતત્ય પ્રહર્ષા-
દ્વિદ્યુદ્દીપૈર્જિનમુપહરન્ભક્તિભારાવનમ્રઃ ।
દ્રષ્ટાસિ ત્વં દધદિવ મુહુઃ સ્વામિસેવાનુરાગં
સાન્ધ્યં તેજઃ પ્રતિનવજપાપુષ્પરક્તં દધાનઃ ॥ ૧૪ ॥ (Megha 38b)

ભક્તિં કુર્વઞ્શતમખ ઇવાઽઽવિર્ભવદ્દિવ્યરૂપ-
શ્ચિત્રાં વૃત્તિં સ્વરસરચિતાં શૈખિનીં વા મનોજ્ઞામ્ ।
કણ્ઠચ્છાયાં સ્વવપુષિ વહન્મા યન્ સાધુવાદં
નૃત્યારમ્ભે હર પશુપતેરાર્દ્રનાગાજિનેચ્છામ્ ॥ ૧૫ ॥ (Megha 38c)

નાટ્યં તન્વન્સુરુચિરતનુર્નાટય વ્યોમરઙ્ગે
તારાપુષ્પપ્રકરરુચિરે સૌમ્યવિદ્યુન્નટીં તામ્ ।
નાયં રૌદ્રો મૃદુરિતિ ચિરં સાધુવાદૈઃ પ્રિયાન્તે
શાન્તોદ્વેગસ્તિમિતનયનં દૃષ્ટભક્તિર્ભવાન્યા ॥ ૧૬॥ (Megha 38d)

text of shloka No. 17 not visible cearly in page 155 of the book
ગચ્છન્તીનાં રમણવસતિં યોષિતાં તત્ર નક્તમ્ ॥ ૧૭ ॥ (Megha 39a)

ગર્જત્યુચ્ચૈર્ભવતિ પિહિતવ્યોમમાર્ગે રમણ્યો
ગાઢોત્કણ્ઠા મદનવિવશાઃ પુંસુ સઙ્કેતગોષ્ઠીમ્ ।
એકાકિન્યઃ કથમિવ રતૌ ગન્તુમીશા નિશીથે
રુદ્ધાલોકે નરપતિપથે સૂચિભેદ્યૈસ્તમોભિઃ ॥ ૧૮ ॥ (Megha 39b)

text of shlokam No. 19 not visible cearly in page 157 of the book
સૌદામિન્યા કનકનિકષસ્નિગ્ધયા દર્શયોર્વીમ્ ॥ ૧૯ ॥ (Megha 39c)

ક્રીડાહેતોર્યદિ ચ ભવતો ગર્જનેનોત્સુકત્વં

મન્દં મન્દં સ્તનય વનિતાનૂપુરારાવહૃદ્યમ્ ।
તાસામન્તર્મણિતસુભગં સમ્ભૃતાસારધારઃ
તોયોત્સર્ગસ્તનિતમુખરો મા સ્મ ભૂર્વિક્લવાસ્તાઃ ॥ ૨૦॥ (Megha 39d)

ભ્રાન્ત્વા કૃત્સ્નાં પુરમિતિ ચિરં રાત્રિસમ્ભોગધૂપૈ-
ર્લબ્ધામોદઃ સુખમનુભવ ત્વં ગરીયાનશેષામ્ ।
તાં કસ્યાચ્ચિદ્ભવનવલભૌ સુપ્તપારાવતાયા (Megha 40a)
નીત્વા રાત્રીં ચિરવિલસનાત્ ખિન્નવિદ્યુત્કલત્રઃ ॥ ૨૧॥ (Megha 40b)

યદ્યપ્યસ્યાં ક્ષણપરિચયઃ સ્વર્ગવાસાતિશાયી
તત્રાऽऽસક્તિં સપદિ શિથિલીકૃત્ય વૈરં ચ યોગાત્ ।
દૃષ્ટે સૂર્યે પુનરપિ ભવાન્ વાહયેદધ્વશિષ્ટં (Megha 40c) var વાહયેદધ્વશેષં
મન્દાયન્તે ન ખલુ સુહૃદામભ્યુપેતાર્થકૃત્યાઃ ॥ ૨૨॥ (Megha 40d)

રુદ્ધે ભાનૌ નયનવિષયં નોપયાતિ ત્વયાऽસૌ
ભાસો ભઙ્ગાદઘનિરસનં મા સ્મ ભૂત્ત્વન્નિમિત્તમ્ ।
તસ્મિન્કાલે નયનસલિલં યોષિતાં ખણ્ડિતાનાં (Megha 41a)
શાન્તિં નેયં પ્રણયિભિરતો વર્ત્મ ભાનોસ્ત્યજાશુ ॥ ૨૩॥ (Megha 41b)

અન્યચ્ચાન્યવ્યસનવિધુરેણાऽऽર્ય મિત્રેણ ભાવ્યં
તન્મા ભાનોઃ પ્રિયકમલિનીસંસ્તવં ત્વં નિરુન્ધાઃ ।
પ્રાલેયાસ્રં કમલવદનાત્સોऽપિ હર્તું નલિન્યાઃ (Megha 41c)
પ્રત્યાવૃત્તસ્ત્વયિ કરરુધિ સ્યાદનલ્પાભ્યસૂયઃ ॥ ૨૪॥ (Megha 41d)

ગમ્ભીરેતિ ત્વમપિ સુભગાં તાં ધુનીં માऽવસંસ્થાઃ
ગત્વા તસ્યા રસમનુભવ ત્વય્યતિસ્વચ્છવૃત્તેઃ ।
ગમ્ભીરાયાઃ પયસિ સરિતશ્ચેતસીવ પ્રસન્ને (Megha 42a)
છાયાત્માऽપિ પ્રકૃતિસુભગો લપ્સ્યતે તે પ્રવેશમ્ ॥ ૨૫॥ (Megha 42b)

તસ્માદેવં પ્રણયપરતાં ત્વય્યભિવ્યઞ્જયન્તી
લીલાહાસાનિવ વિદધતી સા ધુની શીકરોત્થાન્ ।
તસ્માદસ્યાઃ કુમુદવિશદાન્યર્હસિ ત્વં ન ધૈર્યા- (Megha 42c) var તસ્માત્ તસ્યાઃ
ન્મોઘીકર્તું ચટુલશફરોદ્વર્તનપ્રેક્ષિતાનિ ॥ ૨૬॥ (Megha 42d)

જ્ઞાસ્યસ્યસ્યુચ્ચૈઃપુલિનજઘનાદુચ્ચરન્પક્ષિમાલા-
ભાસ્વત્કાઞ્ચીમધુરરણિતાત્ કામસેવાપ્રકર્ષમ્ ।
તસ્યાઃ કિઞ્ચિત્કરધૃતમિવ પ્રાપ્તવાનીરશાખં (Megha 43a)

હૃત્વા નીલં સલિલવસનં મુક્તરોધોનિતમ્બમ્ ॥ ૨૭॥ (Megha 43b) var નીત્વા

તામુત્ફુલ્લપ્રતતલતિકાગૂઢપર્યન્તદેશાં
કામાવસ્થામિતિ બહુરસં દર્શયન્તીં નિપદ્ય ।
પ્રસ્થાનં તે કથમપિ સખે લમ્બમાનસ્ય ભાવિ (Megha 43c)
જ્ઞાતાસ્વાદો વિવૃતજઘના કો વિહાતું સમર્થઃ ॥ ૨૮॥ (Megha 43d) var વિવૃતજઘનાં

ઉત્તીર્યામૂં કથમપિ તતો ગન્તુમુદ્યચ્છમાનં
ત્વામુન્નેષ્યત્યનુવનમસૌ ગન્ધવાહઃ સુગન્ધઃ ।
ત્વન્નિષ્યન્દોચ્છ્વસિતવસુધાગન્ધસમ્પર્કરમ્યઃ (Megha 44a)
સ્રોતોરન્ધ્રધ્વનિતમધુરં દન્તિભિઃ પીયમાનઃ ॥ ૨૯॥ (Megha 44b)
var સ્રોતોરન્ધ્રધ્વનિતસુભગં

ગત્વા કિઞ્ચિચ્છ્રમપરિજુષસ્ત્વત્ક્લમચ્છેદદક્ષઃ
પ્રત્યુદ્યાસુઃ પ્રિયસુહૃદિવારૂઢસૌગન્ધ્યયોગઃ ।
નીચૈર્વાસ્યત્યુપજિગમિષોર્દેવ પૂર્વં ગિરિં તે (Megha 44c)
શીતો વાયુઃ પરિણમયિતા કાનનોદુમ્બરાણામ્ ॥ ૩૦॥ (Megha 44d)

ઈશોમાભ્યામપચિતપદં તં પુપુત્રીયિપુભ્યાં
પૂજાં જૈનીં વિરિરચયિપું સ્વૌકસિ પ્રાજ્યભક્ત્યા ।
તત્ર સ્કન્દં નિયતવસતિં પુષ્પમેઘીકૃતાત્મા (Megha 45a)
પુષ્પાસારૈઃ સ્નપયતુ ભવાન્વ્યોમગઙ્ગાજલાર્દ્રૈઃ ॥ ૩૧॥ (Megha 45b)

પૂજ્યં દેવૈર્જિનપતિમજં પૂજયન્તં સદૈનં
દૃષ્ટ્વા પૂતં ત્વમપિ ભવતાદ્દેવવૃન્દે દિવાઽગ્ર્યમ્ ।
રક્ષાહેતોર્નવશશિભૃતા વાસવીનાં ચમૂના- (Megha 45c)
મત્યાદિત્યં હુતવહમુખે સંભૃતં તદ્ધિ તેજઃ ॥ ૩૨॥ (Megha 45d)

સોઽપિ ત્વત્તઃ શ્રુતિપથસુખં ગર્જિતં પ્રાપ્ય બર્હી
તુષ્ટઃ કેકાઃ પ્રતિવિકુરુતે વાહનં તસ્ય ભર્તુઃ ।
જ્યોતિર્લેખાવલયિ ગલિતં યસ્ય બર્હં ભવાની (Megha 46a)
પુત્રપ્રેમ્ણા કુવલયપદપ્રાપિ કર્ણે કરોતિ ॥ ૩૩॥ (Megha 46a)

યઃ સદ્ધર્માત્સકલજગતાં પાવકાલ્લબ્ધજન્મા
તસ્ય પ્રીત્યા પ્રથમમુચિતાં સત્સપર્યાં વિધેહિ ।
ધૌતાપાઙ્ગં હરશશિરુચા પાવકેસ્તં મયૂરં (Megha 46c)
પશ્ચાદદ્રિગ્રહણગુરુભિર્ગર્જિતૈર્નર્તયેથાઃ ॥ ૩૪॥ (Megha 46d)

હૃદ્યે સ્વચ્છેસરસિ વિપુલે ધર્મસઞ્જ્ઞો ભવત્વા-
લ્લબ્ધાભિખ્યં ભુવનજનતામાનનીયં વ્રજાઽઽશુ ।
આરાધ્યૈનં શરવણભવં દેવમુલ્લઙ્ઘિતાધ્વા (Megha 47a)
સિદ્ધદ્વન્દ્વૈર્જલકણભયાદ્વીણિભિર્મુક્તમાર્ગઃ ॥ ૩૫॥ (Megha 47b)

ગત્વા તસ્માદવિરલગલન્નિર્ઝરાન્તર્મલાં તાં
પ્રાપ્યાઽકીર્તિં જનવદનજાં ક્ષાલયન્પુણ્યતોયૈઃ।
વ્યાલમ્બેથાઃ સુરભિતનયાલમ્ભજાં માનયિષ્યન્ (Megha 47c)
સ્રોતોમૂર્ત્યા ભુવિ પરિણતાં રન્તિદેવસ્ય કીર્તિમ્ ॥ ૩૬॥ (Megha 47d)

તસ્યા મધ્યેજલમુપજિતામ્ભોનિકાયે મુહૂર્ત
છાયાં કૃષ્ણાજિનમદહરાં સન્દધાને સમગ્રામ્ ।
મન્યે યુક્તં સરિતિ સુતરાં તત્ર ચર્મણ્વતીતિ
ત્વય્યાદાતું જલમવનતે શાર્ઙ્ગિણો વર્ણચૌરે ॥ ૩૭॥ (Megha 48a)

ત્વય્યભ્યર્ણે હરતિ સલિલં તત્ર રાહોસ્સવર્ણે
નૂનં જ્યોત્સ્નાવિસરવિમલં તર્કયેયુર્નભોગાઃ ।
મધ્યે નીલં સિતમિવ દુકૂલોત્તરીયં પૃથિવ્યાઃ
તસ્યાઃ સિન્ધોઃ પૃથુમપિ તનું દૂરભાવાત્પ્રવાહમ્ ॥ ૩૮॥ (Megha 48b)

two pages in the original text (pages 182, 183) missing, so unable to get the shloka-s 39 and 40; the fourth lines of the missing shlokams are given below

પ્રેક્ષિષ્યન્તે ગગનગતયો નૂનમાવર્જ્ય દૃષ્ટીઃ ॥ ૩૯॥ (Megha 48c)

એકં મુક્તાગુણમિવ ભુવઃ સ્થૂલમધ્યેન્દ્રનીલમ્ ॥ ૪૦॥ (Megha 48d)

એવમ્પ્રાયાં સલિલવિહૃતિં તત્ર કૃત્વા મુહૂર્તં
વારાં પુણ્યાં સુરગજ ઇવ વ્યોમમાર્ગાનુસારી ।
લીલાં પશ્યન્ પ્રજવિપવનોદ્ધૂતવીચીચયાનાં
તામુત્તીર્ય વ્રજ પરિચિતભ્રૂલતાવિભ્રમાણામ્ ॥ ૪૧॥ (Megha 49a)

તસ્યાઃ સિન્ધોરનુવનમુદક્તીરભાજાં લતાના-
મુત્ફુલ્લાનાં તતમધુલિહાં મુક્તધારાં પ્રવર્ષન્ ।
સીતાપૂરં વ્રજ લઘુ તતો જાતહાર્દસ્તુ માનાત્
પક્ષ્મોત્ક્ષેપાદુપરિવિલસત્કૃષ્ણશરપ્રભાણામ્ ॥ ૪૨॥ (Megha 49b)

ગચ્છન્માર્ગે પ્રિયમુપહરેઃ પ્રાણનાથોપયાન-
પ્રત્યાશ્વાસાદ્ધ્રિયતિ સુદૃશાં કૃષ્ણશારોદરાણામ્ ।
લક્ષ્મીકુર્વન્ પથિકવનિતાલોચનોલ્લાસકાનાં
કુન્દક્ષેપાનુગમધુકરશ્રીમુષામાત્મબિમ્બમ્ ॥ ૪૩॥ (Megha 49c)

તસ્મિન્નધ્વન્યનતિચિરયન્નધ્વનીનઃ પ્રયાયાઃ
યસ્મિન્યાત્રાફલમવિકલં લપ્સ્યસે દૈવયોગાત્ ।
જૈત્રેષૂણામિવ હૃદિશયસ્યાયતાનાં સ્વબિમ્બં
પાત્રીકુર્વન્દશપુરવધૂનેત્રકૌતૂહલાનામ્ ॥ ૪૪॥ (Megha 49d)

રમ્યાન્દેશાનિતિ બહુવિધાન્સાદરં વીક્ષમાણઃ
દેશાતિથ્યં વ્રજતુ સ ભવાંસ્તત્ર તત્રાઽપિ વર્ષન્ ।
સસ્યક્ષેત્રે ગિરિષુ સરિતામન્તિકે ચ સ્થલે ચ
બ્રહ્માવર્તં જનપદમથ ચ્છાયયા ગાહમાનઃ ॥ ૪૫॥ (Megha 50a) var જનપદમધશ્છાયયા

યસ્મિન્નદ્યઃ ક્ષતજકલુષાઃ કૌરવીણાં ચમૂનાં
પ્રાવર્તન્ત પ્રતિયુયુધિરે યત્ર ચામોઘશસ્ત્રાઃ।
પાણ્ડોઃ પુત્રાઃ પ્રતિહનનતઃ પાપભીતાઃ સશઙ્કં
ક્ષેત્રં ક્ષત્રપ્રધનપિશુનં કૌરવં તદ્ ભજેથાઃ ॥ ૪૬॥ (Megha 50b)

વીરક્ષોણીં ભુવનવિદિતાં તાં ક્ષણેન વ્યતીયાઃ
ક્ષાત્રં તેજઃ પ્રતિભયભટસ્તમ્ભનૈઃ સૂચયન્તીમ્ ।
રાજન્યાનાં શિતશરશતૈર્યત્ર ગાણ્ડીવધન્વા (Megha 50c
ધારાપાતૈસ્ત્વમિવ કમલાન્યભ્યવર્ષન્મુખાનિ ॥ ૪૭॥ (Megha 50d)

પુણ્યક્ષેત્રં તદપિ ભજનીયં હિ તસ્યોપકણ્ઠે
યસ્મિન્સોઽસ્થાત્તપસિ હલભૃત્ પ્રાત્તરાજર્ષિવૃત્તઃ ।
શાર્ઙ્ગિણ્યસ્તં ગતવતિ મહીનિઃસ્પૃહો મન્મથીયાં
હિત્વા હાલામભિમતરસાં રેવતીલોચનાઙ્કામ્ ॥ ૪૮॥ (Megha 51a)

તાસ્તે પુણ્યં વિદધતિ પુરા ભૂમયો દૃષ્ટમાત્રાઃ
વન્દ્યાઃ પુંસાં પરિગમનતસ્ત્વાં પુનન્ત્યેવ સદ્યઃ ।
પૃથ્વીમેનાં સ કિલ વિહરન્નાત્તદીક્ષઃ પ્રજાસુ
બન્ધુસ્નેહાત્સમરવિમુખો લાઙ્ગલી યાઃ સિષેવે ॥ ૪૯॥ (Megha 51b) var બન્ધુપ્રીત્યા

સદ્ભિસ્તીર્ણાઃ પ્રવિમલતરાઃ પુષ્કલાઃ સુપ્રસન્નાઃ
હૃદ્યાઃ સદ્યઃ કલિમલમુષો યાઃ સતીનાં સદૃક્ષાઃ ।

કૃત્વા તાસામભિગમમપાં સૌમ્ય સારસ્વતીનાં (Megha 51c)
અન્તઃશુદ્ધસ્ત્વમપિ ભવિતા વર્ણમાત્રેણ કૃષ્ણઃ ॥ ૫૦॥ (Megha 51d)

યાસ્તા નદ્યઃ કુલગિરિભવાઃ સ્વર્ધુનીરૂઢિભાજઃ
તાસામેતાઃ પ્રતિનિધિતયા તત્સમાખ્યાઃ કુનદ્યઃ।
તીર્થાલોકે ત્વમુપસર તાં જાહ્નવીં યન્મયોક્તં
તસ્માદ્ગચ્છેરનુકનખલં શૈલરાજાવતીર્ણામ્ ॥ ૫૧॥ (Megha 52a)

મોપેક્ષિષ્ઠાસ્ત્વામુપનદિકેત્યાશુ ગત્વા પ્રવિશ્ય
પ્રાહુસ્તીર્થપ્રતિનિધિમપિ ક્ષાલનં કશ્મલાનામ્ ।
તાં સેવેથાઃ સુભગ સુરસાં લોકરૂઢેઃ પ્રતીતાં
જહ્નોઃ કન્યાં સગરતનયસ્વર્ગસોપાનપઙ્ક્તિમ્ ॥ ૫૨॥ (Megha 52b)

તામેવૈનાં કલય સરિતં ત્વં પ્રપાતે હિમાદ્રેઃ
ગઙ્ગાદેવ્યાઃ પ્રતિનિધિગતસ્યાદિદેવસ્ય ભર્તુઃ ।
ગૌરી વક્ત્રભ્રુકુટિરચનાં યા વિહસ્યેવ ફેનૈઃ (Megha 52c)
શમ્ભોઃ કેશગ્રહણમકરોદિન્દુલગ્નોર્મિહસ્તા ॥ ૫૩॥ (Megha 52d)

સ્વાદુ સ્વચ્છં શુચિ હિમશિલાસમ્ભવં હારિ નીરં
પ્રાપ્તામોદં તટવનપતત્પુપકિઞ્જલ્કવાસૈઃ।
અધ્વશ્રાન્તિં શ્લથયિતુમધઃ પ્રાપ્તમાત્રોઽધ્યવસ્યેઃ
તસ્યાઃ પાતું સુરગજ ઇવ વ્યોમ્નિ પૂર્વાર્ધલમ્બી ॥ ૫૪॥ (Megha 53a)

તીવ્રોદન્યાશ્રમપરિગતો ન ત્વકં ચેત્તદનીં
તૂષ્ણીં સ્થિત્વા ક્ષણમિવ ગતાધ્વશ્રમો જાતવર્ષઃ ।
મધ્યેગઙ્ગં હૃદમધિવસેર્ભૂરિ તસ્યાઃ પ્રપાતું
ત્વં ચેદચ્છસ્ફટિકવિશદં તર્કયેસ્તિર્યગમ્ભઃ ॥ ૫૫॥ (Megha 53b)

તિષ્ઠત્વેકં ક્ષણમિવ ભવાનિદ્રનીલસ્ય લક્ષ્મી-
માતન્વાનઃ સ્વવપુષિ ભૃશં પીતતોયોઽપિ યેન ।
સંસર્પન્ત્યા સપદિ ભવતઃ સ્રોતસિ ચ્છાયયા સા (Megha 53c) var છાયયાસૌ
સ્યાદસ્થાનોપગતયમુનાસઙ્ગમેવાભિરામા ॥ ૫૬॥ (Megha 53d)

પુણ્યામ્બૂનામિતિ ભૃતિતરં ચર્મપૂરં પ્રપૂર્ણઃ
કિઞ્ચિદ્ગત્વા હિમવદચલસ્યાઽનુપાદં નિષીદ ।
તત્પર્યન્તે વનપરિકરં પ્રેક્ષણિયં પ્રપશ્ય-
ન્નાસીનાનાં સુરભિતશિલં નાભિગન્ધૈર્મૃગાણામ્ ॥ ૫૭॥ (Megha 54a)

વિશ્રમ્યાઽથો ઘન ઘનપથોલ્લઙ્ઘિકૂટં હિમાઙ્કં
પશ્યોદગ્રૈઃ શિખરતરુભિસ્ત્વાભિવોપાન્તયન્તમ્ ।
સ્વસ્યાઃકીર્તેરિવ વિધુરુચો નાકભાજાં સ્રવન્ત્યા-
સ્તસ્યા એવ પ્રભવમચલં પ્રાપ્ય ગૌરં તુષારૈઃ ॥ ૫૮॥ (Megha 54b)

આરુહ્યાવિર્મદકલમયૂરારવૈઃ કૃષ્યમાણઃ
કુઞ્જે કુઞ્જે દધિ ઘનમિવ પ્રેક્ષમાણો હિમાનીમ્ ।
વક્ષ્યસ્યધ્વશ્રમવિનયને તસ્ય શ‍ૃઙ્ગે નિષણ્ણઃ (Megha 54c)
શોભાં શુભ્રત્રિનયનવૃષોત્ખાતપઙ્કોપમેયામ્ ॥ ૫૯॥ (Megha 54d)

અધ્વક્ષામં શિથિલિતતનું શૈલમાર્ગાધિરોહા-
ત્વામૌલ્લઙ્ઘ્યે ઘટયિતુમસૌ શક્નુયાદેવ વહ્નિઃ ।
ધૂમૈઃ સાન્દ્રૈર્વનવિટપિજૈર્નાતિવર્ષન્નુપેયાઃ
તં ચેદ્વાયૌ સરતિ સરલસ્કન્ધસઙ્ઘટ્ટજન્મા ॥ ૬૦॥ (Megha 55a)

આશ‍ૃઙ્ગાગ્રં કવચિતમિવારૂઢમૂર્તિં હિમાન્યા
ત્વત્સાન્નિધ્યાદુપહિતરસૈશ્ચૌષધીનાં સહસ્રૈઃ।
આકીર્ણાન્તં સરસગહનં શૈલરાજં ન ચૈનં
બાધેતોલ્કાક્ષપિતચમરીબાલભારો દવાગ્નિઃ ॥ ૬૧॥ (Megha 55b)

ત્વત્તો નિર્યન્સ યદિ સહસા વિદ્યુતો જાતવેદાઃ
પ્રાલેયાદ્રિં સતુહુનવનં નિર્દિધક્ષેત્તદા સ્વૈઃ।
અર્હસ્યેનં શમયિતુમલં વારિધારાસહસ્રૈ- (Megha 55c)
રાપન્નાર્તિપ્રશમનફલાઃ સમ્પદો હ્યુત્તમાનામ્ ॥ ૬૨॥ (Megha 55d)

મોચ્ચૈસ્તત્ર સ્તનિતનિનદાનાદ્રિકુઞ્જે તથાસ્ત્વં
મૈષાં તદ્ભૂદ્ભયમસુહરં શૌર્યદર્પોદ્ધુરાણામ્ ।
યે સંરમ્ભોત્પતનરભસાસ્સ્વાઙ્ગભઙ્ગાય તસ્મિન્ (Megha 56a)
મુક્તાધ્વાનં સપદિ શરભા લઙ્ઘયેયુર્ભવન્તમ્ ॥ ૬૩॥ (Megha 56b)

યદ્યપ્યેતે સ્તનિતરભસાદુત્પતેયુર્ભવન્તં
તૈર્યગ્યોના ભૃશમપધિયઃ સ્વાઙ્ગભઙ્ગૈકનિષ્ઠાઃ ।
તાન્કુર્વીથાસ્તુમુલકરકાવૃષ્ટિહાસાવકીર્ણાન્ (Megha 56c)
કેષાં ન સ્યુઃ પરિભવપદં નિષ્ફલારમ્ભયત્નાઃ ॥ ૬૪॥ (Megha 56d) var કે વા ન સ્યુઃ

તત્ર વ્યક્તં દૃષદિ ચરણન્યાસમર્ધેન્દુમૌલે- (Megha 57a)

રર્ચ્યં ભર્તિસ્ત્રિભુવનગુરોરર્હતઃ સત્સપર્યૈઃ।
શશ્વત્સિદ્ધૈરુપહૃતબલિં ભક્તિનમ્રઃ પરીયાઃ (Megha 57b)
પાપાપાયે પ્રથમમુદિતં કારણં ભક્તિરેવ ॥ ૬૫॥

યસ્મિન્દૃષ્ટે કરણવિગમાદૂર્ધ્વમુદ્ધૂતપાપાઃ (Megha 57c)
સિદ્ધક્ષેત્રં વિદધતિ પદં ભક્તિભાજસ્તમેનમ્ ।
દૃષ્ટ્વા પૂતસ્ત્વમપિ ભવતાદ્રૈ પિનર્દૂરતોઽમું
કલ્પિષ્યન્તે સ્થિરગણપદપ્રાપ્તયે શ્રદ્દધાનાઃ ॥ ૬૬॥ (Megha 57d) var સંકલ્પન્તે

તસ્યોપન્તે રિરચયિપવો નૂનમાતોદ્યગોષ્ઠીં
શબ્દાયન્તે મધુરમનિલૈઃ કીચકાઃ પૂર્યમાણાઃ (Megha 58a)
તત્રાસેવાં વિતિતનુષુભિર્લોકભર્તુર્જિનસ્ય
સંરક્તાભિસ્ત્રિપુરવિજયો ગીયતે કિન્નરીભિઃ ॥ ૬૭॥ (Megha 58b)

વેણુષ્વેષુ સ્ફુટમિતિ તદા મન્દ્રતારં ધ્વનત્સુ
પ્રોદ્ગાયન્તીષ્વતિકલકલં તજ્જયં કિન્નરીષુ ।
નિર્હ્રાદી તે મુરવ ઇવ ચેત્કન્દરીષુ ધ્વનિઃ સ્યાત્ (Megha 58c) var મુરજ ઇવ ચેત્કન્દરીષુ
સઙ્ગીતાર્થો નનુ પશુપતેસ્તત્ર ભાવી સમસ્તઃ ॥ ૬૮॥ (Megha 58d) var સમગ્રઃ

પ્રાલેયાદ્રેરુપતટમતિક્રમ્ય તાંસ્તાન્ વિશેષાન્ (Megha 59a)
તસ્યાઽદૂરે કુકવિતાકલ્પિતં તત્પ્રતીયાઃ ।
હંસદ્વારં ભૃગુપતિયશોવર્ત્મ યત્ ક્રૌઞ્ચરન્ધ્રમ્ । (Megha 59b)
દણ્ડેનાઽઽવિષ્કૃતમિવ ગુહાદ્વારકં વૈજયાર્ધમ્ ॥ ૬૯॥

બહ્વાશ્ચર્યે હિમવતિ કૃતાલોકનત્વાદસઙ્ગઃ
તેનોદીચીં દિશમનુસરેસ્તિર્યગાયામશોભી । (Megha 59c)
કૃષ્ણઃ સર્પો ગુરુરિવ ગિરેર્ગહ્વરાનિષ્પતાશુ
શ્યામઃ પાદો બલિનિયમનેઽભ્યુદ્યતસ્યેવ વિષ્ણોઃ ॥ ૭૦॥ (Megha 59d)

તસ્માદ્ધૂમપ્રચય ઇવ નિઃસૃત્ય શૈલસ્ય રન્ધ્રાદ્-
ગત્વા ચોર્ધ્વં દશમુખભુજોચ્છ્વાસિતપ્રસ્થસન્ધેઃ । (Megha 60a)
શુભ્રાદભ્રસ્ફટિકઘટનાશોભિગણ્ડોપલસ્ય
કૈલાસસ્ય ત્રિદશવનિતાદર્પણસ્યાતિથિઃ સ્યાઃ ॥ ૭૧॥ (Megha 60b)

ક્ષીરાદચ્છચ્છવિભિરભિતઃ પ્રોચ્ચલન્નિર્ઝરૌઘૈઃ
શ‍ૃઙ્ગોચ્છ્રાયૈઃ કુમુદવિશદૈર્યો વિતત્ય સ્થિતઃ ખમ્ । (Megha 60c)
નૃત્તારમ્ભે પ્રતિકૃતિગતસ્યાદિભર્તુઃ પુરસ્તાદ્-

રાશીભૂતઃ પ્રતિદિનમિવ ત્ર્યમ્બકસ્યાટ્ટહાસઃ ॥ ૭૨॥ (Megha 60d)

ઉત્પશ્યામિ ત્વયિ તટગતે સ્નિગ્ધભિન્નાઞ્જનાભે (Megha 61a)
શોભામદ્રેર્વટતરુમતો મણ્ડલભ્રાજિતસ્ય ।
સદ્યઃકૃત્તદ્વિરદદશનચ્છેદગૌરસ્ય તસ્ય (Megha 61b)
પ્રાલેયાંશોર્ગ્રસિતુમનસા રાહુણેવાશ્રિતસ્ય ॥ ૭૩॥

ત્વય્યરૂઢેશિખરમભિતિઽધિત્યકાં તસ્ય મન્યે
પાર્શ્વાગ્રે વા પુનરપિ દશાસ્યાવતારપ્રપઞ્ચમ્ ।
લીલામદ્રેઃ સ્તિમિતનયનપ્રેક્ષણીયાં ભવિત્રી- (Megha 61c) var var શોભામદ્રેઃ
મંસન્યસ્તે સતિ હલભૃતો મેચકે વાસસીવ ॥ ૭૪॥ (Megha 61d)

તસ્મિન્હિત્વા ભુજગવલયં શમ્ભુના દત્તહસ્તા (Megha 62a) var હિત્વા તસ્મિન્
સમ્પ્રાપ્યોચ્ચૈર્વિરચિત ઇવાનીલરત્નસ્ત્વયીમ્ ।
ક્રીડાશૈલે યદિ ચ વિહરેત્પાદચારેણ ગૌરી (Megha 62b) var વિચરેત્
મા સ્મ સ્ફૂર્જઃ સિતિફણિભયાન્મા સ્મ સઙ્ક્લેદિની ભૂત્ ॥ ૭૫॥

ઇન્દ્રાણી ચેદુપગતવતી જૈનગેહાનુપાતં
તસ્મિન્નિજ્યાં રચયિતુમના દેવભક્ત્યા તદાસ્યાઃ।
ભઙ્ગીભક્ત્યા વિરચિતવપુઃ સ્તમ્ભિતાન્તર્જલૌઘઃ (Megha 62c )
સોપાનં ત્વં કુરુ મણિતટારોહણાયાગ્રચારી ॥ ૭૬॥ (Megha 62d) var મણિતટારોહણાયાગ્રયાયી

અન્તસ્તોયોચ્ચલનસુભગાં ભાવિનીં તામવસ્થાં
મન્વાનાંસ્તાસ્સુનિભૃતતરં સાનુદેશે નિષણ્ણમ્ ।
તત્રાવશ્યં વલયકુલિશોદ્ઘટ્ટનોદ્ગીર્ણતોયં (Megha 63a)
નેષ્યન્તિ ત્વાં સુરયુવતયો યન્ત્રધારાગૃહત્વમ્ ॥ ૭૭॥ (Megha 63b)

આકર્ષન્તયો દૃતિમિવ સરસ્તોયપૂર્ણામધસ્તાત્
ક્રીડિષ્યન્તિ ત્રિદશવનિતાસ્ત્વામિતશ્ચામુતશ્ચ ।
તાભ્યો મોક્ષો યદિ તવ સખે ઘર્મલબ્ધસ્ય ન સ્યાત્ (Megha 53c) var મોક્ષસ્તવ યદિ સખે
ક્રીડાલોલાઃ શ્રવણપરુષૈર્ગર્જિતૈર્ભીષયેસ્તાઃ ॥ ૭૮॥ (Megha 63d) var ભાર્યયેસ્તાઃ

કૃચ્છ્રાન્મુક્તો વિવિધકરણૈસ્તત્ર રન્ત્વાઽથ તાભિ-
ર્ભૂયઃ શૈલે વિહર ગમિતો વાયુનાઽઽમવ્રણાઙ્ગમ્ ।
હેમામ્ભોજપ્રસવિ સલિલં માનસસ્યાઽઽદદાનઃ (Megha 64)
કુર્વન્કામં ક્ષણમુખપટપ્રીતિમૈરાવણસ્ય ॥ ૭૯॥ (Megha 64b) var કુર્વન્કામાત્, ઐરાવતસ્ય

ક્રીડાદ્રીણાં કનકશિખરાણ્યાવસંસ્તત્ર પશ્યન્
સ્વર્ગસ્ત્રીણાં નિધુવનલતાગેહસમ્ભોગદેશાન્ ।
ધુન્વન્કલ્પદ્રુમકિસલયાન્યંશુકાનિ સ્વવાતૈઃ(Megha 64c) var અશુકાનીવ વાતૈઃ
નાનાચેષ્ટૈર્જલદ લલિતૈર્નિર્વિશેસ્તં નગેન્દ્રમ્ ॥૮૦॥ (Megha 64d)

વિદ્યુદ્દામ્ના વલયિતતનુસ્તત્ર વર્ધ્યેવ સ્થિદ્ધો
દીર્ઘં સ્તિત્વા સરતિ પવને મન્દમન્દં દિનાન્તે ।
તસ્માદદ્રેરવતર પુરીં સ્વેષ્ટકામો ધનીશાં
તસ્યોત્સઙ્ગે પ્રણયિન ઇવ સ્રસ્તગઙ્ગાદુકૂલામ્ ॥ ૮૧॥ (Megha 65a)

દૃષ્ટાધ્યાત્મસ્થિતિરધિગતાશેષવેદ્યઃ સવિદ્યઃ
યોગાભ્યાસાદ્ભુવનમખિલં સઞ્ચરન્દૂરદર્શી ।
લક્ષ્મ્યા સૂતિં ભુવનવિદિતાં તાં પુરીં તત્ર સાક્ષા-
ન્ન ત્વં દૃષ્ટ્વા ન પુનરલકાં જ્ઞાસ્યસે કામચારિન્ ॥ ૮૨॥ (Megha 65b)

નિર્વાણાર્થં તિતિપસિષવોઽમી સ્વયં ક્લેશયન્તિ
વ્યર્થોદ્યોગા મયિ તુ વિતૃષઃ કિન્નુ મત્તોઽધિકં તત્ ।
ઇત્યાકૂતાદ્વિહસિતમિવામ્ભોમુચામિન્દુશુભ્રં
યા વઃ કાલે વહતિ સલિલોદ્ગારમુચ્ચૈર્વિમાના ॥ ૮૩॥ (Megha 65c)

સૌધેયાગ્રૈર્ગગનપરિષત્કેતુમાલાબલાકં
રત્નોદગ્રદ્યુતિવિરચિતેન્દ્રાયુધં પ્રાવૃષેણ્યમ્ ।
ધત્તે યાઽસૌ સજલકણિકાસારમભ્રંલિહૈઃ સ્વૈઃ
મુક્તાજાલગ્રથિતમલકં કામિનીવાભ્રવૃન્દમ્ ॥ ૮૪॥ (Megha 65d)

યત્રાનીલં હરિમણિમયાઃ ક્ષુદ્રશૈલા નભોગં
પ્રોદ્યદ્દેવદ્રુમપરિસરદ્ધૂપધૂમાનુબન્ધાઃ ।
પ્રાસાદાશ્ચ પ્રથયિતુમલં સર્વદા મેઘકાલં
વિદ્યુત્વન્તં લલિતવનિતાઃ સેન્દ્રચાપં સચિત્રાઃ ॥ ૮૫॥ (Megha 66a)

પ્રોચ્ચૈઃ કેકારવમુખરિતાન્નર્તયન્તો મયૂરાન્
હંસાનુદ્યત્કરુણવિરુતાન્માનસે મ્લાનયન્તઃ ।
યત્રાઽકાલે વિદધનિતરાં દેવદિણ્ણયેષુ સન્ધ્યા-
સઙ્ગીતાય પ્રહતમુરજાઃ સ્નિગ્ધપર્જન્યઘોષમ્ ॥ ૮૬॥ (Megha 66b) var સ્નિગ્ધગમ્ભીરઘોષમ્

યત્રાકીર્ણં વિતતશિખરાઃ સાનકા મન્દ્રઘોષં
વિદ્યુદ્ભાસા વિરચિતતનું રત્નદીપાનુયાતાઃ।

સૌધાભોગાસ્તુલયિતુમલં શશ્વદોઘં ઘનાના-
મન્તસ્તોયં મણિમયભુવસ્તુઙ્ગમભ્રંલિહાગ્રાઃ ॥ ૮૭॥ (Megha 66c)

કૂટોચ્છાયૈસ્તુહિનવિશદૈઃ શારદાનમ્બુદૌઘાન્
મન્દ્રાતોદ્યધ્વનિભિરુદધીનુચ્ચરદ્વારિવેલાન્ ।
રત્નોદંશુપ્રસરરુચિરૈર્ભિત્તિભાગૈઃ કુલાદ્રીન્
પ્રાસાદાસ્ત્વાં તુલયિતુમલં યત્ર તૈસ્તૈર્વિશેષૈઃ ॥ ૮૮॥ (Megha 66d)

પઙ્ક્તીભૂતાઃ શ્રમજલકણૈરાદ્રતપ્રસ્તરાન્તા
બદ્ધોત્કણ્ઠસ્તનતટપરામૃષ્ટવર્ણાવિશીર્ણાઃ।
સમ્ભોગાન્તે શ્રમમુપચિતં સૂચયન્ત્યઙ્ગરાગાઃ
યત્ર સ્ત્રીણાં પ્રિયતમભુજોચ્છાસિતાલિઙ્ગિતાનામ્ ॥ ૮૯॥ (Megha 75a)
var પ્રિયતમભુજાલિઙ્ગનોચ્છ્વાસિતાનાં

યસ્યામિન્દોરનતિચરતો નાતિસાન્દ્રં પતન્તો
ગૌરીભર્તુર્વિરચિતજટામૌલિભાજો મયૂખાઃ।
નેતું સદ્યો વિલયમમલાઃ શક્નુયુર્દમ્પતીના-
મઙ્ગગ્લાનિં સુરતજનિતાં તન્તુજાલાવલમ્બાઃ ॥ ૯૦॥ (Megha 75b)

એકાકિન્યો મદનવિવશા નીલવાસોવગુણ્ઠાઃ
પ્રાપ્તાકલ્પા રમણવસતીર્યાતુકામાસ્તરુણ્યઃ।
યત્રાપાસ્તે તમસિ વિપણીરાશ્રયન્ત્યુત્પથેભ્ય-
સ્ત્વત્સંરોધાપગમવિશદૈશ્ચન્દ્રપાદૈર્નિશીથે ॥ ૯૧॥ (Megha 75c)

તાસાં પાદ્યં વિતરિતુમિવોપહ્વરે નિષ્કુટાનાં
ધૌતોપાન્તા ભવનવલભેરિન્દુપાદાભિવર્ષાત્ ।
યસ્યાં રાત્રૌ શ્રમમપથકે પ્રસ્તુતાઃ કામુકીનાં
વ્યાલુમ્પન્તિ સ્ફુટજલલવસ્યન્દિનશ્ચન્દ્રકાન્તાઃ ॥ ૯૨॥ (Megha 75d)

સંલક્ષ્યન્તે ચિરયતિ મનોવલ્લભે કામિનીનાં
ગચ્છન્તીનાં સ્ખલિતવિષમં રાત્રિસમ્ભોગહેતોઃ।
સૌભાગ્યાઙ્કૈરિવ વિલસિતૈરાતતા રાજમાર્ગાઃ
ગત્યુત્કમ્પાદલકપતિતૈર્યત્ર મન્દારપુષ્પૈઃ ॥ ૯૩॥ (Megha 76a)

યત્રોદ્યાને કુસુમિતલતામણ્ડપેષુ સ્થિતાનાં
શય્યોપાન્તૈર્વિતતમધુપૈરાત્તસમ્ભોગગન્ધૈઃ।
નીલોત્તંસૈર્નિધુવનપદં સૂચ્યતે દમ્પતીનાં

ક્લૃપ્તચ્છેદૈઃ કનકકમલૈઃ કર્ણવિભ્રંશિભિશ્ચ ॥ ૯૪॥ (Megha 76b) var પત્રચ્છેદૈઃ

મન્દાકિન્યાસ્તટવનમનુ ક્રીડતાં દમ્પતીનાં
પુષ્પાસ્તીર્ણાઃ પુલિનરચિતા યત્ર સમ્ભોગદેશાઃ।
સંસૂચ્યન્તે બહુતરફલૈઃ કુઙ્કુમારક્તશોભૈ-
ર્મુક્તાજાલૈઃ સ્તનપરિસરચ્છિન્નસૂત્રૈશ્ચ હારૈઃ ॥ ૯૫॥ (Megha 76c)

ગત્યાયાસાદ્ગલિતકબરીબન્ધમુક્તૈઃ સભૃઙ્ગૈઃ
કીર્ણૈઃ પુષ્પૈઃ કુસુમધનુષો બાણપાતાયમાનૈઃ ।
લાક્ષારાગૈશ્ચરણનિહિતૈરપ્યધિક્ષોણિ યસ્યાં
નૈશો માર્ગઃ સવિતુરુદયે સૂચ્યતે કામિનીનામ્ ॥ ૯૬॥ (Megha 76d)

મન્યે યસ્યા જગતિ સકલોઽપ્યસ્તિ નૌપમ્યમન્ય-
ત્સર્વૌપમ્યપ્રણિહિતધિયા વેધસા નિર્મિતાયાઃ ।
યામધ્યાસ્તે કમલનિલયા સમ્પદશ્ચ પ્રજાના-
માનન્દોત્થં નયનસલિલં યત્ર નાઽન્યૈર્નિમિત્તૈઃ ॥ ૯૭॥ (Megha 70a)

યત્રત્યાનાં ન પરપરતા ચિત્તભર્તુઃ પરત્ર
નાન્યો ભઙ્ગઃ પ્રણયિનિ જને માનભઙ્ગં વિહાય ।
નાઽન્યો બન્ધઃ પ્રિયજનતયા સઙ્ગમાશાનુબન્ધા-
ન્નાન્યસ્તાપઃ કુસુમશરજાદિષ્ટસંયોગસાધ્યાત્ ॥ ૯૮॥ (Megha 70b)

યત્રાકલ્પાન્નિધિષુ સકલાનેવ સમ્પાદયત્સુ
નાર્થી કશ્ચિન્ન ખલુ કૃપણો નાપિ નિઃસ્વો જનોઽસ્તિ ।
ધર્મઃ સાક્ષાન્નિવસતિ સતીં યામલઙ્કૃત્ય યસ્મા-
ન્નાપ્યન્યત્ર પ્રણયકલહાદ્વિપ્રયોગોપપત્તિઃ ॥ ૯૯॥ (Megha 70c) var નાપ્યન્યસ્માત્

યસ્યૈ શક્રઃ સ્પૃહયતિતરામિષ્ટસર્વાર્દ્ધિભાજે
યત્રાસીનાઃ શતમખપુરીં વિસ્મરન્ત્યેવ સદ્યઃ ।
નાન્યચ્ચિન્ત્યં વિહરણભયાદ્યત્ર મૃત્યુઞ્જયાનાં
વિત્તેશાનાં ન ચ ખલુ વયો યૌવનાદન્યદસ્તિ ॥ ૧૦૦॥ (Megha 70d)

નૂનં કલ્પદ્રુમસહચરાસ્તત્સધર્માણ એતે
સઞ્જાતાઃ સ્યુઃ ષડૃતુકુસુમાન્યેકશો યત્પ્રદધ્યુઃ।
અક્ષીણર્દ્ધિ ધ્રુવમુપગતાઃ પલ્લવોલ્લાસિતા યે
યત્રોન્મત્તભ્રમરમુખરાઃ પાદપા નિત્યપુષ્પાઃ ॥ ૧૦૧॥ (Megha 69a)

તત્સાન્નિધ્યાદિવ વનલતાઃ શિક્ષિતાસ્તન્નિયોગં
નાનાભેદં વિતરિતુમલં તાશ્ચ દિવ્યં પ્રસૂનમ્ ।
તાભિઃ સ્પર્ધામિવ ચ ગમિતા યત્ર ભૃઙ્ગોપગીતા
હંસશ્રેણીરચિતરશના નિત્યપદ્મા નલિન્યઃ ॥ ૧૦૨॥ (Megha 69b)

યસ્યાં નિત્યપ્રહતમુરવામ્ભોદનાદૈઃ પ્રતીતા
નૃત્યન્ત્યુચ્ચૈર્વિરચિતલયં તાણ્ડવૈશ્ચિત્રપિચ્છાઃ।
નાણારત્નૈરિવ ચ નિધયો નિર્મિતા જઙ્ગમાસ્તે
કેકોત્કણ્ઠા ભવનશિખિનો નિત્યભાસ્વત્કલાપાઃ ॥ ૧૦૩॥ (Megha 69c)

જ્યોત્સ્નંમન્યેષ્વમરવસતિં વ્યાહસત્સુ સ્વભૂત્યા
હર્મ્યેષૂદ્યદ્ધલભિષુ સુધાપઙ્કધૌતેષુ યસ્યાઃ ।
નિર્વિશ્યન્તે નિધિભુગધિપૈઃ સ્ત્રીસહાયૈર્વિતન્વ-
ન્નિત્યજ્યોત્સ્નાપ્રતિહતતમોવૃત્તિરમ્યાઃ પ્રદોષાઃ ॥ ૧૦૪॥ (Megha 69d) var નિત્યજ્યોત્સ્નાઃ પ્રતિહત

દૃષ્ટ્વા યસ્યાઃ પ્રકૃતિચતુરામાકૃતિં સુન્દરીણાં
ત્રૈલોક્યેઽપિ પ્રથમગણનામીયુષીં જાતલજ્જા।
મન્યે લક્ષ્મીઃ સપદિ વિસૃજેદેવ સંલુચ્ય કેશાન્
હસ્તે લીલાકમલમલકે બાલકુન્દાનુવિદ્ધમ્ ॥ ૧૦૫॥ (Megha 68a)

યત્ર સ્ત્રીણાં સ્મિતરુચિલસજ્જ્યોત્સ્નયાઽઽબદ્ધશોભા
પ્રાલેયાંશોઃ શ્રિયમુપહસત્યસ્તદોષાઽકલઙ્કા ।
ભૂયો લક્ષ્મીં હિમમહિમજાં માનયન્તીભિરાભિ-
ર્નીતા લોધ્રપ્રસવરજસા પાણ્ડુતામાનનશ્રીઃ ॥ ૧૦૬ ॥ (Megha 68b) var પાણ્ડુતામાનને શ્રીઃ

યત્રાકલ્પે સ્વરુચિરચિતે કલ્પવૃક્ષપ્રસૂતે
સત્યેવ સ્યાત્પ્રિયમભિનવપ્રીતિમાદૃત્ય કિઞ્ચિત્ ।
યક્ષસ્ત્રીણાં યદુપનિહિતં તાભિરાત્તાનુરાગં
ચૂડાપાશે નવકુરબકં ચારુ કર્ણે શિરીષમ્ ॥ ૧૦૭ ॥ (Megha 68c)

પાણૌ પદ્મં કુરબકયુતં સ્વોચિતે ધામ્નિ કુન્દં
લૌધ્રો રેણુઃ સ્તનપરિસરે હારિ કર્ણે શિરીષમ્ ।
વ્યક્તિવ્યક્તં વ્યતિકરમહો તત્ર ષણ્ણામૃતૂનાં
સીમન્તે ચ ત્વદુપગમજં યત્ર નીપં વધૂનામ્ ॥ ૧૦૮ ॥ (Megha 68d)

શક્રમ્મન્યાઃ પરિણતશરચ્ચન્દ્રિકાનિર્મલાનિ
પ્રોત્તુઙ્ગાનિ પ્રણયવિવશાઃ સ્વાપતેયોષ્મવન્તિ ।

આક્રીડન્તે પ્રિયયુવતિભિઃ સર્વકામાભિતૃપ્તા
યસ્યાં યક્ષાઃ સિતમણિમયાન્યેત્ય હર્મ્યસ્થલાનિ ॥ ૧૦૯ ॥ (Megha 71a)

યત્ર જ્યોત્સ્નાવિમલિતતલાન્યાશ્રિતાઃ કુટ્ટિમાનિ
પ્રાસાદાનાં હરિમણિમયાન્યાસવામોદવન્તિ ।
રંરમ્યન્તે દ્રવિણપતયઃ પૂર્ણકામાઃ નિકામં
જ્યોતિશ્છાયાકુસુમરચનાન્યુત્તમસ્ત્રીસહાયાઃ ॥ ૧૧૦ ॥ (Megha 71b) var કુસુમરચિતાન્યુત્તમસ્ત્રીસહાયાઃ

લોલાપાઙ્ગાઃ સુરસરસિકાઃ પ્રોન્નતભ્રૂવિકારાઃ
પ્રાણેશાનાં રહસિ મદનાચાર્યકં કર્તુમીશાઃ।
સ્વાધીનેઽર્થે વિફલમિતિ વા વામનેત્રા ન યસ્યા-
માસેવન્તે મધુ રતિફલં કલ્પવૃક્ષપ્રસૂતમ્ ॥ ૧૧૧ ॥ (Megha 71c)

ગેહે ગેહે ધનદસચિવૈર્યત્ર ધર્માનુરાગાત્
દિવ્યૈર્ગન્ધૈઃ સુરભિકુસુમૈઃ સાક્ષતૈર્ધૂપદીપૈઃ।
સઙ્ગીતાદ્યૈરપિ જિનમહો વર્ત્યતે પુણ્યકામૈ-
સ્ત્વદ્ગમ્ભીરધ્વનિષુ મધુરં પુષ્કરેષ્વાહતેષુ ॥ ૧૧૨ ॥ (Megha 71d) var સ્ત્વદ્ગમ્ભીરધ્વનિષુ શનકૈઃ

વાસઃ ક્ષૌમં જિગલિષુ શનૈર્નૂનમાદેષ્ટુકામં
યૂનાં કામપ્રસવભવનં હારિ નાભેરધસ્તાત્ ।
કાઞ્ચીદામ્ના કિમપિ વિધૃતં લક્ષ્યતે કામિનીનાં
નીવીબન્ધોચ્છ્વસિતશિથિલં યત્ર બિમ્બાધરાણામ્ ॥ ૧૧૩ ॥ (Megha 73a)

યસ્યાં કામદ્વિપમુખપટચ્છાયમાસ્રસ્તનીવી
શ્રીમચ્છ્રોણીપુલિનવરણં વારિ કાઞ્ચીવિભઙ્ગમ્ ।
પૂર્વં લજ્જા વિગલતિ તતો ઘર્મતોયં વધૂનાં
ક્ષૌમં રાગાદનિભૃતકરેષ્વાક્ષિપત્સુ પ્રિયેષુ ॥ ૧૧૪ ॥ (Megha 73b)

આક્ષિપ્તેષુ પ્રિયતમકરૈરંશુકેષુ પ્રમોહા-
દન્તર્લીલાતરલિતદૃશો યત્ર નાઽલં નવોઢાઃ।
શય્યોત્થાયં વદનમરુતાઽપાસિતું ધાવમાના
અર્ચિસ્તુઙ્ગાનભિમુખમપિ પ્રાપ્ય રત્નપ્રદીપાન્ ॥ ૧૧૫ ॥ (Megha 73c) var અર્ચિષ્ટુઙ્ગાનભિમુખમપિ

વસ્ત્રાપાયે જઘનમભિતો દૃષ્ટિપાતં નિરોદ્ધું
યૂનાં ક્લૃપ્તા સુરભિરચિતા યત્ર મુગ્ધાઙ્ગનાનામ્ ।
કમ્પાયત્તાત્કરકિસલયાદન્તરાલે નિપત્ય
હ્રીમૂઢાનાં ભવતિ વિફલપ્રેરણા ચૂર્ણમુષ્ટિઃ ॥ ૧૧૬ ॥ (Megha 73d) var વિફલપ્રેરણચ્ચૂર્ણમુષ્ટિઃ

પ્રત્યાસન્નૈઃ શિખરખચિતૈરુન્મયૂખૈર્વિચિત્રૈ-
શ્ચિત્રા રત્નૈર્નભસિ વિતતાઃ શક્રચાપાનુકારૈઃ ।
બિભ્રત્યુચ્ચૈઃ સજલજલદા સદ્વિતાનસ્ય લીલાં
નેત્રા નીતાઃ સતતગતિના યદ્વિમાનાગ્રભૂમીઃ ॥ ૧૧૭ ॥ (Megha 74a)

અધ્યાસીના ભવનવલભિં શારદી મેઘમાલા
યત્રાऽऽમુક્તપ્રતનુવિસરચ્છીકરાસારધારા ।
ભીત્વેવાऽऽલં વ્રજતિ વિલયં પશ્યતામેવ સાક્ષાત્
આલેખ્યાનાં સ્વજલકણિકાદોષમુત્પાદ્ય સદ્યઃ ॥ ૧૧૮ ॥ (Megha 74b) var નવજલકણૈર્દોષમુત્પાદ્ય

॥ ઇત્યમોઘવર્ષપરમેશ્વરપરમગુરુશ્રીજિનસેનચાર્યવિરચિતમેઘદૂતવેષ્ટિતે
પાર્શ્વાભ્યુદયે ભગવત્કૈવલ્યવર્ણનં નામ દ્વિતીયઃ સર્ગઃ ॥

## ॥ અથ તૃતીયઃ સર્ગઃ ॥

વેગાસન્તર્ભવનવલભેઃ સમ્પ્રવિષ્ટાઃ કથઞ્ચિત્
સૂક્ષ્મીભૂતાઃ સુરતરસિકૌ દમ્પતી તત્ર દૃષ્ટ્વા।
શઙ્કાસ્પૃષ્ટા ઇવ જલમુચસ્ત્વાદૃશા યત્ર જાલૈ- (Megha 74c) var જાલમાર્ગૈઃ
ર્ધૂમોદ્ગારાનુકૃતિનિપુણા જર્જરા નિષ્પતન્તિ ॥ ૧॥ (Megha 74d)

સ્ત્રીભિઃ સાર્ધં કનકકદલીષણ્ડભાજામુપાન્તે
ક્રીડાદ્રીણાં નિધિભુગધિપા યત્ર દીવ્યન્ત્યભીક્ષ્ણમ્ ।
મન્દાકિન્યાઃ સલિલશિશિરૈઃ સેવ્યમાના મરુદ્ભિઃ (Megha 72a)
મન્દારાણાં તટવનરુહાં છાયયા વારિતોષ્ણાઃ ॥ ૨॥ (Megha 72b) var મન્દારાણામનુતટરુહાં

સૌન્દર્યસ્ય પ્રથમકલિકાં સ્ત્રીમયીં સૃષ્ટિમન્ચાં
વ્યાતન્વાના જયકદલિકા મીનકેતોર્જિગીષોઃ ।
અન્વેષ્ટવ્યૈઃ કનકસિકતમુષ્ટિનિક્ષેપગૂઢૈઃ (Megha 72c)
સઙ્ક્રીડન્તે મણિભિરમરપ્રાર્થિતા યત્ર કન્યાઃ ॥ ૩॥ (Megha 72d)

ઇષ્ટાન્ કામાનુપનયતિ યઃ પ્રાક્તનં પુણ્યપાકં
તં શંસન્તિ સ્ફુટમનુચરા રાજરાજસ્ય તૃપ્તાઃ।
અક્ષય્યાન્તર્ભવનનિધયઃ પ્રત્યહં રક્તકણ્ઠૈ- (Megha 77a)
રુદ્ગાયદ્ભિર્ધનપતિયશઃ કિન્નરૈર્યત્ર સાર્ધમ્ ॥ ૪॥ (Megha 77b)

યસ્યાં મન્દ્રાનકપટુરવૈર્બોધિતા વિત્તભર્તુ-
ર્ભૃત્યા ભૃઙ્ગૈઃ સમમુપહિતપ્રીતયઃ કામદાયિ ।
વૈભ્રાજાખ્યં વિબુધવનિતાવારમુખ્યાસહાયાઃ (Megha 77c)
બદ્ધાલાપા બહિરુપવનં કામિનો નિર્વિશન્તિ ॥ ૫ ॥ (Megha 77d)

યસ્મિન્ કલ્પદ્રુમપરિકરઃ સર્વલોકોપભોગ્યા -
નિષ્ટાન્ભોગાન્સુકૃતિનિ જને શશ્ફલાન્પમ્ફુલીતિ ।
વાસશ્ચિત્રં મધુ નયનયોર્વિભ્રમાદેશદક્ષં (Megha 78a)
પુષ્પોદ્ભેદં સહ કિસલયૈર્ભૂષણાનાં વિકલ્પમ્ ॥ ૬ ॥ (Megha 78b)

રુચ્યાહારં રસમભિમતં સ્રગ્વિકલ્પં વિપઞ્ચી-
માહાર્યાણિ સ્વરુચિરચિતાન્યંશુકાન્યઙ્ગરાગમ્ ।
લાક્ષારાગં ચરણકમલન્યાસયોગ્યં ચ યસ્મિન્ (Megha 78c) var યસ્યાં
એકઃ સૂતે સકલમબલામણ્ડનં કલ્પવૃક્ષઃ ॥ ૭ ॥ (Megha 78d)

ભૂમિં સ્પ્રષ્ટું દ્રુતમુખખુરા ગહ્મમાના ઇવાઽમી
પત્રશ્યામા દિનકરહયસ્પર્ધિનો યત્ર વાહાઃ (Megha 67a)
મન્દાક્રાન્તા દિગિભવિભુભિઃ સ્પર્ધમાના ઇવોચ્ચૈઃ
શૈલોદગ્રાસ્ત્વમિવ કરિણો વૃષ્ટિમન્તઃ પ્રભેદાત્ ॥ ૮॥ (Megha 67b )

મન્યે તેઽપિ સ્મરપરવશાઃ કામિનીદૃષ્ટિબાણૈ-
ર્જાયેરન્યે ત્વમિવ મુનયો ધીધના યત્ર કેઽમી ।
યોધાગ્રણ્યઃ પ્રતિદશમુખં સંયુગે તસ્થિવાંસઃ (Megha 67c)
પ્રત્યાદિષ્ટાભરણરુચયશ્ચન્દ્રહાસવ્રણાઙ્કૈઃ ॥ ૯॥ (Megha 67d)

કામસ્યૈવં પ્રજનનભુવં તાં પુરીં પશ્ય ગત્વા
મિથ્યા લોકો વદતિ જડધીર્નાન્વિદં લોકમૂઢમ્ ।
મત્વા દેવં ધનપતિસખં યત્ર સાક્ષાદ્વસન્તં (Megha 79a)
પ્રાયશ્ચાપં ન વહતિ ભયાન્મન્મથઃ ષટ્પદજ્યમ્ ॥ ૧૦॥ (Megha 79b)

સ્યાદ્વા સત્યં કુકવિરચિતં કાવ્યધર્માનુરોધાત્
સત્યપ્યેવં સકલમુદિતં જાઘટીત્યેવ યસ્માત્ ।
સભ્રૂભઙ્ગપ્રહિતનયનૈઃ કામિલક્ષ્યેષ્વમોઘૈ- (Megha 79c)
સ્તસ્યાઽઽરમ્ભશ્ચતુરવનિતાવિભ્રમૈરેવ સિદ્ધઃ ॥ ૧૧॥ (Megha 79d)

સ્યાદારેકા બહુનિગદિતં કસ્તવેદં પ્રતીયાત્
સદ્વાઽસદ્વા તદિતિ નનુ ભોઃ પ્રત્યયં તે કરોમિ ।

તત્રાગારં ધનપતિગૃહાનુત્તરેણાઽસ્મદીયં (Megha 80a)
દૂરાલ્લક્ષ્યં સુરપતિધનુશ્ચારુણા તોરણેન ॥ ૧૨॥ (Megha 80b)

પુષ્પોદ્ગન્થિર્મૃદુકિસલયો ભૃઙ્ગસઙ્ગીતહારી
સાન્દ્રચ્છાયઃ સલિલધરણોપાન્તપુસ્તૈણશાવઃ।
યસ્યોદ્યાને કૃતકતનયો વર્દ્ધિતઃ કાન્તયા મે (Megha 80c) var યસ્યોપાન્તે કૃતકતનયઃ કાન્તયા વર્ધિતો મે
હસ્તપ્રાપ્યસ્તબકનમિતો બાલમન્દારવૃક્ષઃ ॥ ૧૩॥ (Megha 80d)

નાઽહં દૈત્યો ન ખલુ દિવિજઃ કિન્નરઃ પન્નગો વા
વાસ્તવ્યોઽહં ધનદનગરે ગુહ્યકોઽયં મદીયા।
વાપી ચાઽસ્મિન્મરકતશિલાબદ્ધસોપાનમાર્ગા (Megha 81a)
હૈમૈઃ સ્ફીતા વિકચકમલૈર્દીર્ઘવૈદૂર્યનાલૈઃ ॥ ૧૪॥ (Megha 81b) var હૈમૈશ્છન્ના વિકચકમલૈઃ સ્નિગ્ધવૈદૂર્યનાલૈઃ

તાં જાનીયાઃ કમલરજસા ધ્વસ્તતાપં તતાપાં
મત્પુણ્યાનાં સૃતિમિવ સતીં વાપિકાં વિસ્તૃતોર્મીમ્ ।
તસ્યાસ્તોયે કૃતવસતયો માનસં સન્નિકૃષ્ટં (Megha 81c) var યસ્યાસ્તોયે
નાધ્યાસ્યન્તિ વ્યપગતશુચસ્ત્વામપિ પ્રેક્ષ્ય હંસાઃ ॥ ૧૫॥ (Megha 81d) var ન ધ્યાસ્યન્તિ

અન્યચ્ચાસ્મિન્નુપવનઘને મદ્ગૃહોપાન્તદેશે
સ્યાદાખ્યેયં મયકિ સુતરાં પ્રત્યયો યેન તે સ્યાત્ ।
તસ્યાસ્તીરે વિહિશિખરઃ પેશલૈરિન્દ્રનીલૈઃ (Megha 82a) var રચિતશિખરઃ
ક્રીડાશૈલઃ કનકકદલીવેષ્ટનપ્રેક્ષણીયઃ ॥ ૧૬॥ (Megha 82b)

રત્યાધારો રતિકર ઇવોત્તુઙ્ગમૂર્તિર્વિનીલઃ
શૈલો મૂલે કનકપરિધિર્મે મનોઽધ્યાઽનુશાસાત્ ।
મદ્ગેહિન્યા પ્રિય ઇતિ સખે ચેતસા કાતરેણ (Megha 82c)
પ્રેક્ષ્યોપાન્તસ્ફુરિતતડિતં ત્વાં તમેવ સ્મરામિ ॥ ૧૭॥ (Megha 82d)

તન્મે વાક્યાદપગતભયસ્ત્વં વ્યવસ્યાઽઽત્મનીનં
તીર્થે ધ્વાઙ્ક્ષ સ્થિતમપનુદન્સ્યાઃ સ્થિરાત્મા મદુક્તે ।
તત્રૈવાઽઽસ્તે તવ ચ દયિતા લપ્સ્યતે લબ્ધજન્મા
તન્વી શ્યામા શિખરદશના પક્કબિમ્બાધરોષ્ઠી ॥ ૧૮॥ (Megha 87a) var પક્વબિમ્બાધરોષ્ઠી

યસ્યા હેતોસ્તવ ચ મમ ચ પ્રાગ્ભવેઽભૂદ્વિરોધઃ
તત્રોત્પન્ના નિવસતિ સતી સાઽધુના કિન્નરાણામ્ ।
દૃષ્ટા સૌમ્યં સજલનયના ત્વં સ્મરન્તી સ્મરાર્તા
મધ્યે ક્ષામા ચકિતહરિણીપ્રેક્ષણા નિમ્નનાભિઃ ॥ ૧૯॥ (Megha 87b)

દૃષ્ટ્વા ભૂયઃ સ્મરપરવશા ચન્દ્રકાન્તોપલાન્તે
ધ્યાયન્તી ત્વાં સહસહચરં સન્દિદૃક્ષુર્લિખિત્વા ।
યાન્તી તસ્માન્નયનસલિલૈર્દૃષ્ટિમાર્ગે નિરુદ્ધે
શ્રોણીભારાદલસગમના સ્તોકનમ્રા સ્તનાભ્યામ્ ॥ ૨૦॥ (Megha 87c)

કામાવસ્થામિતિ બહુતિથીં ધારયન્તી ત્વયાઽસૌ
જ્ઞેયા સાક્ષાદ્રતિરિવ મનોહારિણી તત્ર ગત્વા।
નાનાવેષે બહુવિલસિતે કિન્નરસ્ત્રીસમાજે
યા તત્ર સ્યાદ્યુવતિવિષયા સૃષ્ટિરાદ્યેવ ધાતુઃ ॥ ૨૧॥ (Megha 87d)

સાધ્વીં ચિત્તે વિધિનિયમિતામન્યપૌંસ્ને નિરાશાં
કન્યાવસ્થાં ત્વદુપગમને બદ્ધકામાં સખીનામ્ ।
ભ્રાતુર્વાક્યાત્પ્રણયવિવશાં ત્વં વિતર્ક્યાન્યથાઽલં
તાં જાનીયાઃ પરિમિતકથાં જીવિતં મે દ્વિતીયમ્ ॥ ૨૨॥ (Megha 88a) var જાનીથાઃ

સખ્યાનીતૈઃ સરસકદલીગર્ભપાત્રોપવીજ્યૈઃ
લબ્ધ્વાશ્વાસં કિમપિ કિમપિ મ્લિષ્ટવર્ણં લપન્તીમ્ ।
શીર્ણપ્રાયાં વિરહવિધુરામાવયોર્બદ્ધસામ્યા-
દૂરીભૂતે મયિ સહચરે ચક્રવાકીમિવૈકામ્ ॥ ૨૩॥ (Megha 88b)

મય્યાયાતે કરકિસલયન્યસ્તવક્ત્રેન્દુમુગ્ધા
ત્વામેવાહર્નિશમભિમનાશ્ચિન્તયન્તી વિયોગાત્ ।
યાતા નૂનં બત તવ દશામાશુ મર્તવ્યશેષાં
ગાઢોત્કણ્ઠાગુરુષુ દિવસેષ્વેષુ ગચ્છત્સુ બાલા ॥ ૨૪॥ (Megha 88c) var ગાઢોત્કણ્ઠા ગુરુષુ

તસ્યાઃ પીનસ્તનતટભરાત્સામિનમ્રાગ્રભાગા
નિશ્વાસોષ્ણપ્રદવિતમુખામ્ભોજકાન્તિર્વિરૂક્ષા ।
ચિત્તાવેશાત્તનુરપચિતા સાલસાપાઙ્ગવીક્ષા
જાતા મન્યે શિશિરમથિતાં પદ્મિનીવાન્યરૂપા ॥ ૨૫॥ (Megha 88d) var પદ્મિનીં વાન્યરૂપામ્

નિદ્રાપાયાદ્રજનિષુ મુહુસ્તાવકં સમ્પ્રયોગં
દિધ્યાસોઃ સ્યાદ્વદનમપરં ત્વિન્દુબિમ્બાનુકારિ ।
નૂનં તસ્યાઃ પ્રબલરુદિતોચ્છૂનનેત્રં બહૂનાં (Megha 89a) var પ્રિયાયા
નિશ્વાસાનામશિશિરતયા ભિન્નવર્ણાધરોષ્ઠમ્ ॥ ૨૬॥ (Megha 89b) var નિઃશ્વાસાનામશિશિરતયા

ત્વાં ધ્યાયન્ત્યા વિરહશયનાભોગમુક્તાખિલાઙ્ગ્યાઃ

શઙ્કે તસ્યા મૃદુતલમવષ્ટભ્ય ગણ્ડોપધાનમ્ ।
હસ્તન્યસ્તં મુખમસકલવ્યક્તિ લમ્બાલકત્વા- (Megha 89c)
દિન્દોર્દૈન્યં ત્વદુપસરણક્લિષ્ટકાન્તેર્બિભર્તિ ॥ ૨૭॥ (Megha 89d) var ત્વદનુસરણક્લિષ્ટકાન્તેર્બિભર્તિ

તસ્યાઃ પીડાં રહયિતુમલં તૌ ચ મન્યે મૃગાક્ષ્યાઃ
મદ્ગેહિન્યાઃ સહ સહચરી સેવતે યૌ દ્વિતીયા।
રક્તાશોકશ્ચલકિસલયઃ કેસરશ્ચાત્ર કાન્તઃ (Megha 83a)
પ્રત્યાસન્નૌ કુરબકવૃતેર્માધવીમણ્ડપસ્ય ॥ ૨૮॥ (Megha 83b)

કામસ્યૈકં પ્રસવભવનં વિદ્ધિ તૌ મન્નિવેશે
મદ્ગેહિન્યા વિરચિતતલૌ સેવનીયૌ પ્રિયાયાઃ ।
એકઃ સખ્યાસ્તવ સહ મયા વામપાદાભિલાષી (Megha 83c)
કાઙ્ક્ષત્યન્યો વદનમદિરાં દોહદચ્છદ્મનાऽસ્યાઃ ॥ ૨૯॥ (Megha 83d)

મૂલં વોચ્ચૈર્મનસિ નિહિતં લક્ષ્યતે ત્વદ્વિયોગા-
ત્તસ્યા સાધ્વાધ્યવસિતમૃતેર્બર્હિણાધિષ્ઠિતાગ્રા।
તન્મધ્યે ચ સ્ફટિકફલકા કાઞ્ચની વાસયષ્ટિ- (Megha 84a)
ર્મૂલે બદ્ધા મણિભિરનતિપ્રૌઢવંશપ્રકાશૈઃ ॥ ૩૦॥ (Megha 84b)

તાં કામિન્યાઃ કુસુમધનુષો વૈજયન્તીમિવૈકાં
મત્વાર્ચન્તિ પ્રબલરુદિતા સાપિ સાધ્વી ત્વદાસ્થૈ ।
તાલૈઃ શિઞ્જાવલયસુભગૈઃ કાન્તયા નર્તિતો મે (Megha 84c) var શિઞ્જાવલયસુભગૈર્નર્તિતઃ કાન્તયા મે
યામધ્યાસ્તે દિવસવિગમે નીલકણ્ઠઃ સુહૃદ્વઃ ॥ ૩૧॥ (Megha 84d)

પ્રીતિસ્તસ્યા મમ ચ યુવતેર્નિર્વિવેકા તતોऽહં
જાનામ્યેનાં વ્યસનપતિતાં મદ્ગૃહે તચ્ચરોऽહમ્ ।
એભિઃ સાધો હૃદયનિહિતૈર્લક્ષણૈર્લક્ષયેથાઃ (Megha 85a)
દ્વારોપાન્તે લિખિતવપુષૌ શઙ્ખપદ્મૌ ચ દૃષ્ટ્વા ॥ ૩૨॥ (Megha 85b)

તસ્યા દુઃખપ્રશમનવિધૌ વ્યાપૃતે મત્કલત્રે
મૂકીભૂતેऽપ્યનુચરજને મન્દમન્દાયમાને ।
ક્ષામચ્છાયં ભવનમધુના મદ્વિયોગેન નૂનં (Megha 85c)
સૂર્યાપાયે ન ખલુ કમલં પુષ્યતિ સ્વામભિખ્યામ્ ॥ ૩૩॥ (Megha 85d)

પશ્યામુષ્યામુપવનભુવિ પ્રેયસીં તાં દધાના-
માધિં ત્વત્તો વિરહવિધુરાં મદ્વચઃપ્રત્યયેન ।
ગત્વા સદ્યઃ કલભતનુતા શીઘ્રસમ્પાતહેતોઃ (Megha 86a) var કલભતનુતાં

ક્રીડાશૈલે પ્રથમકથિતે રમ્યસાનૌ નિષણ્ણઃ ॥ ૩૪॥ (Megha 86b) var રમ્યસાણૌ

નો ચેદન્તર્ગૃહમધિવસેત્સા દશામુદ્વહન્તી
ગૂઢં દૃષ્ટું સમભિલષિતાં તાં તદા તત્સ્થ એવ ।
અર્હસ્યન્તર્ભવનપતિતાં કર્તુમલ્પાલ્પભાસં (Megha 86c)
ખદ્યોતાલીવિલસિતનિભાં વિદ્યુદુન્મેષદૃષ્ટિમ્ ॥ ૩૫॥ (Megha 86d)

આલોકે તે નિપતતિ પુરા સા બલિવ્યાકુલા વા (Megha 90a)
ત્વત્સમ્પ્રાપ્ત્યૈ વિહિતનિયમાન્ દેવતાભ્યો ભજન્તી ।
બુદ્ધ્યારૂઢં ચિરપરિચિતં ત્વદ્ગતં જ્ઞાતપૂર્વં
મત્સાદૃશ્યં વિરહતનુ વા ભાવગમ્યં લિખન્તી ॥ ૩૭॥ (Megha 90b)

આલિખ્યાऽતો ભવદનુકૃતિં ચક્ષુરુન્મીલ્ય કૃચ્છ્રા-
ત્પશ્યન્તી વા સજલનયનં પ્રાક્તનીં મન્યમાના।
પૃચ્છન્તી વા મધુરવચનાં સારિકાં પઞ્જરસ્થાં (Megha 90c) var શારિકાં
કચ્ચિત્ભર્તુઃ સ્મરસિ રસિકે ત્વં હિ તસ્ય પ્રિયેતિ ॥ ૩૭॥ (Megha 90d)

ઉત્સઙ્ગે વા મલિનવસને સૌમ્ય નિક્ષિપ્ય વીણાં (Megha 91a) var સોમ્ય
ગાઢોત્કણ્ઠં કરુણવિરુતં વિપ્રલાપાયમાનમ્ ।
મદ્ગોત્રાઙ્કં વિરચિતપદં ગેયમુદ્ગાતુકામા । (Megha 91b)
ત્વામુદ્દિશ્ય પ્રચલદલકં મૂર્ચ્છનાં ભાવયન્તી ॥ ૩૮॥

તન્ત્રીરાર્દ્રાં નયનસલિલૈઃ સારયિત્વા કથઞ્ચિત્ (Megha 91c) var તન્ત્રીમાર્દ્રાં
સ્વાઙ્ગુલ્યગ્રૈઃ કુસુમમૃદુભિર્વલ્લકીમાસ્પૃશન્તી ।
ધ્યાયં ધ્યાયં ત્વદુપગમનં શૂન્યચિન્તાનુકણ્ઠી
ભૂયો ભૂયઃ સ્વયમપિ કૃતાં મૂર્ચ્છનાં વિસ્મરન્તી ॥ ૩૯॥ (Megha 91d)

શેષાન્માસાન્ વિરહદિવસસ્થાપિતસ્યાऽવધેર્વા (Megha 92a)
જન્માન્યત્વેऽપ્યધિગતિમિતાન્ દેવભાવાનુભાવાત્ ।
વિન્યસ્યન્તી ભુવિ ગણનયા દેહલીમુક્તપુષ્પૈઃ (Megha 92b) var દેહલીદત્તપુષ્પૈઃ
સ્મૃત્યારૂઢાન્ સ્ફુટયિતુમિવ સ્વાત્મનો મૃત્યુસન્ધીન્ ॥ ૪૦॥

બુધ્યધ્યાસાત્ સ્વપન ઇવ વિસ્પષ્ટભૂયં ત્વયાऽમા
સમ્ભોગં વા હૃદયનિહિતારમ્ભમાસ્વાદયન્તી । (Megha 92c) var (સંયોગં) મત્સઙ્ગં વા
મૂર્ચ્છાસુપ્તા સભયમથવાऽऽશ્વાસ્યમાના સખીભિઃ
પ્રાયેણૈતે રમણવિરહેષ્વઙ્ગનાનાં વિનોદાઃ ॥ ૪૧॥ (Megha 92d)
[ષડ્ભિઃ કુલકમ્]

સવ્યાલાપૈઃ સુખવિરુતિભિસ્તદ્વિનોદૈસ્તથાઽન્યૈઃ
સવ્યાપારામહનિ ન તથા પીડયેદ્વિપ્રયોગઃ । (Megha 93a) var પીડયેન્મદ્વિયોગઃ
સ્વાપાપાયાધ્દૃદયનિહિતં ત્વામજસ્રં સ્મરન્તી
શઙ્કે રાત્રૌ ગુરુતરશુચં નિર્વિનોદાં સખીં તે ॥ ૪૨॥ (Megha 93b)

એવં પ્રાયૈસ્ત્વયિ સુભગતાં વ્યઞ્જયદ્ભિર્યથાર્થૈ-
ર્મત્સન્દેશૈઃ સુખયિતુમતઃ પશ્ય સાધ્વીં નિશીથે । (Megha 93c) var સુખયિતુમલં
પર્યસ્તાઙ્ગીં કુસુમશયને નિસ્સુખામાધિરુદ્ધાં
તામુન્નિદ્રામવનિશયનાં સૌધવાતાયનસ્થઃ ॥ ૪૩॥ (Megha 93d)

ચિત્રન્યસ્તામિવ સવપુષં મન્મથીયામવસ્થા-
માધિક્ષામાં વિરહશયને સન્નિષણ્ણૈકપાર્શ્વામ્ । (Megha 94a)
તાપાપાસ્ત્યૈ હૃદયનિહિતાં હારયષ્ટીં દધાનં
પ્રાચીમૂલે તનુમિવ કલામાત્રશેષાં હિમાંશોઃ ॥ ૪૪॥ (Megha 94b)

મત્કામિન્યા પ્રણયરસિકૈઃ સન્નિધૌ ત્વત્પ્રિયાયા
નીતા રાત્રિઃ ક્ષણ ઇવ મયા સાર્ધમિચ્છારતૈર્યા । (Megha 94c) var ક્ષણમિવ
નિદ્રાદ્વિડ્ભિર્મુહુરુપચિતૈઃ પક્ષ્મરુદ્ભિર્ગલદ્ભિ-
સ્તામેવોષ્ણૈર્વિરહમહતીમશ્રુભિર્યાપયન્તીમ્ ॥ ૪૫॥ (Megha 94d)

અન્તસ્તાપં પ્રપિશુનયતયા સ્વં કવોષ્ણેન ભૂયો
નિઃશ્વાસેનાઽધરકિસલયક્લેશિના વિક્ષિપન્તીમ્ । (Megha 96a)
શુદ્ધસ્નાનાત્ પરુષમલકં નૂનમાગણ્ડલમ્બં (Megha 96b)
વિશ્લિષ્ટં વા હરિણરચિતં લાઞ્છનં તન્મુકેન્દોઃ ॥ ૪૬॥

મદ્વિશ્લેષાદુપહિતશુચો દૂરદેશસ્થિતસ્ય
પ્રાણેશસ્ય સ્વયમનુચિતાનઙ્ગબાધસ્ય જાતુ ।
મત્સમ્યોગઃ કથમુપનમેત્ સ્વપ્નજોઽપીતિ નિદ્રા- (Megha 96c) var મત્સમ્ભોગઃ કથમુપનયેત્
માકાઙ્ક્ષન્તીં નયનસલિલોત્પીડરુદ્ધાવકાશામ્ ॥ ૪૭॥ (Megha 96d)

આદ્યે બદ્ધા વિરહદિવસે યા શિખા દામ હિત્વા (Megha 97a)
જન્મન્યસ્માદ્વ્યવહિતતરે વેણિકા સ્મર્યમાણા ।
શાપસ્યાઽન્તે વિગલિતશુચા તાં મયોદ્વેષ્ટનીયાં (Megha 97b)
સ્વાં નિન્દન્તીં વિરહવપુષં સઙ્ગમં વા વિહાય ॥ ૪૮॥

તાં વક્ત્રેન્દુગ્રસનરસિકાં રાહુમૂર્તિં શ્રિતં વા

વ્યોમચ્છાયાં મદનશિખિનો ધૂમયષ્ટીયમાનામ્ ।
સ્પર્શક્લિષ્ટામયમિતનખેનાઽસકૃત્સારયન્તીં (Megha 97c) var સ્પર્શદ્વિષ્ટામયમિતનખેનાસકૃત્
ગણ્ડાભોગાત્કઠિનવિષમામેકવેણીં કરેણ ॥ ૪૯॥ (Megha 97d)

પાદાનિન્દોરમૃતશિશિરાઞ્જાલમાર્ગપ્રવિષ્ટા- (Megha 95a)
નિષ્ટાન્બન્ધૂનિવ મૃગયિતું સંશ્રિતાન્ સઙ્ગ્રહીતુમ્ ।
પૂર્વપ્રીત્યા ગતમભિમુખં સન્નિવૃત્તં તથૈવ (Megha 95b)
પ્રત્યાહૃત્ય સ્વનયનયુગં ચેતસા ધૂયમાનામ્ ॥ ૫૦॥

ભૂયોભૂયઃ શિશિરકિરણે સ્વાન્કરાઞ્જાલમાર્ગૈ-
રાતન્વાને પુનરપિ ગતાભ્યાગતૈઃ ક્લિશ્યમાનમ્ ।
ખેદાચ્ચક્ષુઃ સલિલગુરુભિઃ પક્ષ્મભિશ્છાદયન્તીં (Megha 95c) var ચક્ષુઃ ખેદાત્
સાભ્રેઽહ્નીવ સ્થલકમલિનીં નપ્રબુદ્ધાં નસુપ્તામ્ ॥ ૫૧॥ (Megha 95d) var ન પ્રબુદ્ધાં ન સુપ્તામ્

[નવભિ કુલકમ્ ]

સા સન્યસ્તાભરણમબલા પેલવં ધારયન્તી (Megha 98a) var પેશલં
વીતાહારા નયનસલિલૈરાપ્લુતાપાણ્ડુગણ્ડમ્ ।
શય્યોત્સઙ્ગે નિહિતમસકૃદ્ દુઃખદુઃખેન ગાત્રં (Megha 98b)
ત્વામપ્યન્તર્વિચલિતધૃતિં તાં દશાં નેતુમર્હેત્ ॥ ૫૨॥

શય્યોપાન્તે ભૃશમપસુખા મત્સ્યલોલં લુલન્તી
બદ્ધોત્કમ્પશ્વસિતવિવશા કામપાત્રાયિતા સા ।
ત્વામપ્યસ્રં નવજલમયં મોચયિષ્યત્યવશ્યં (Megha 98c)
પ્રાયઃ સર્વો ભવતિ કરુણાવૃત્તિરાર્દ્રાન્તરાત્મા ॥ ૫૩॥ (Megha 98d)

બન્ધુપ્રીતિં ગુરુજન ઇવાદૃત્ય કાન્તાદ્વિતીયે
જાને સખ્યાસ્તવ મયિ મનઃ સંભૃતસ્નેહમસ્માત્ । (Megha 99a)
સંવાસાચ્ચ વ્યતિકરમિમં તત્ત્વતો વેદ્મિ તસ્મા-
દિત્થમ્ભૂતાં પ્રથમવિરહે તામહં તર્કયામિ ॥ ૫૪॥ (Megha 99b)

તન્મે સત્યં સકલમુદિતં નિશ્ચિનુ સ્વાર્થસિદ્ધ્યૈ
સ્નિગ્ધાં વૃત્તિં મનસિ ઘટયન્ યેન સાધ્યાનુવિદ્ધમ્ ।
વાચાલં માં ન ખલુ સુભગમ્મન્યભાવઃ કરોતિ (Megha 99c)
પ્રત્યક્ષં તે નિખિલમચિરાદ્ભ્રાતરુક્તં મયા યત્ ॥ ૫૫॥ (Megha 99d)

ભૂયઃ પ્રીત્યૈ ભવતુ સુદતી સા મદાજ્ઞાકૃતસ્તે

સ્નિગ્ધં ચક્ષુસ્ત્વયિ નિદધતી દૃષ્ટમાત્રે પુરા યત્ ।
રુદ્ધાપાઙ્ગપ્રસરમલકૈરઞ્જનસ્નેહશૂન્યં (Megha 100a)
પ્રત્યાદેશાદપિ ચ મધુનો વિસ્મૃતભ્રૂવિલાસમ્ ॥ ૫૬॥ (Megha 100b)

મત્પ્રામાણ્યાદસુનિરસને નિશ્ચિતાત્મા ત્વમેનાં
ભોક્તું યાયા ધનદનગરીં તત્પ્રમાણાય સજ્જે ।
ત્વય્યાસન્ને નયનમુપરિસ્પન્દિ શઙ્કે મૃગાક્ષ્યા (Megha 100c)
મીનક્ષોભાચ્ચલકુવલયશ્રીતુલામેષ્યતીતિ ॥ ૫૭॥ (Megha 100d)

ઇત્યમોઘવર્ષપરમેશ્વરપરમગુરુશ્રીજિનસેનાચાર્યવિરચિતે મેઘદૂતવેષ્ટિતવેષ્ટિતે શ્રીપાર્શ્વાભ્યુદયે ભગવત્કૈવલ્યવર્ણનં નામ તૃતીયઃ સર્ગઃ ।

## ॥ અથ ચતુર્થઃ સર્ગઃ ॥

સન્દિષ્ટં ચ પ્રણયમધુરં કાન્તયા મે દ્વિતીયૈઃ
પ્રાણૈઃ પ્રાણા નવનવવરઃ સન્નિતિઃ ત્વાં પ્રતીદમ્ ।
તત્કર્તું ત્વં ત્વરય લઘુ નઃ કિં કિમેવં ન કુર્યાઃ
વામશ્ચાસ્યાઃ કરરુહપદૈર્મુચ્યમાનો મદીયૈઃ ॥ ૧॥ (Megha 101a)

ભોભો ભિક્ષો મયિ સહરુષિ ક્વ પ્રયાસ્યસ્યવશ્યં
ત્વામુદ્ધેતિપ્રણિપતનકૈઃ સારયિષ્યે તદગ્રમ્ ।
ન પ્રાણાન્સ્વાન્ઘટયિતુમલં તાવકો નિર્ણયો વા
મુક્તાજાલં ચિરપરિચિતં ત્યાજિતો દૈવગત્યા ॥ ૨॥ (Megha 101b)

કિં તે વૈરિદ્વિરદનઘટાકુમ્ભસમ્ભેદનેષુ
પ્રાપ્તસ્થેમા સમરવિજયી વીરલક્ષ્મ્યાઃ કરોઽયમ્ ।
નાઽસ્મત્ખઙ્ગઃ શ્રિતિપથમગાદ્રક્તપાનોત્સવાનાં
સમ્ભોગાન્તે મમ સમુચિતો હસ્તસંવાહનાનામ્ ॥ ૩॥ (Megha 101c)

અસ્યુદ્ગીર્ણે મયિ સુરભટાસ્તેઽપિ બિભ્યત્યસભ્યઃ
કસ્ત્વં સ્થાતું ભણ મમ પુરઃ કિં ન જિહ્રેપિ ભિક્ષો ।
ભાવત્કોઽયં મદસિવિતતાખણ્ડનાત્તત્પુરસ્તાદ્-
યાસ્યત્યૂરુઃ સરસકદલીસ્તમ્ભગૌરશ્ચલત્વમ્ ॥ ૪॥ (Megha 101d)

યસ્મિન્પુંસાં પરિભવકલઙ્કાઙ્કનં સ્યદ્વિપક્ષા-
દ્વીરાલાપે સતિ મદવતો વીરગોષ્ઠીષુ વક્ત્રમ્ ।

વિદ્વન્મન્યો ભણતુ સ ભવાનેવ માનોન્નતાનાં
તસ્મિન્કાલે જલદ યદિ સા લબ્ધનિદ્રાસુખા સ્યાત્ ॥ ૫॥ (Megha 102a)

યા તે બુદ્ધિર્મદપચરિતાદ્ભિભ્યતી લુપ્તસઞ્જ્ઞા
મૂકાવસ્થાં ત્વયિ વિદધતી રુન્ધતી સત્ત્વવૃત્તિમ્ ।
સાવષ્ટમ્ભં ભવ ભટતરો વાર્ધયુદ્ધેઽસ્થિરઃ સ-
ન્વાસ્યૈનાં સ્તનિતવિમુખો યામમાત્રં સહસ્વ ॥ ૬॥ (Megha 102b)

માભૂદ્ભીતિસ્તવ સુરભટત્રાસિગર્જોર્જિતેઽસિ-
પ્રાપ્તે યોદ્ધું મયિ કિમભિયાને મૃતિર્વીરલક્ષ્મ્યાઃ।
વીરમ્મન્યે ત્વયિ મયિ તથાઽન્યત્ર વા પ્રેમભઙ્ગો
મા ભૂદસ્યાઃ પ્રણયિનિ જને સ્વપ્નલબ્ધે કથઞ્ચિત્ ॥ ૭॥ (Megha 102c) var પ્રણયિનિ મયિ

નિસ્સઙ્ગસ્ત્વં ન હિ ભુવિ ભયસ્યાઽઙ્ગમઙ્ગાઙ્ગસઙ્ગાત્
કિં વા જીવન્મતક ભવતોઽપ્યસ્તિ ભીરઙ્ગનાનામ્ ।
કૃત્વા યુદ્ધે વિદધતિ મતિં નાન્વિમે યોધમુખ્યાઃ
સદ્યઃ કણ્ઠચ્યુતભુજલતાગ્રન્થિ ગાઢોપગૂઢમ્ ॥ ૮॥ (Megha 102d)

લક્ષ્મીં ક્ષીણાં સ્વવપુષિ સતીમુદ્યમાખ્યેન દોષા
પ્રોત્થાપ્યાઽલં ભવ યુધિ સતામાશ્રિતાનુગ્રહોઽર્થઃ ।
શંસન્તીદં નનુ નવઘના ધર્મતપ્તક્ષતાં ક્ષ્માં
પ્રોત્થાપ્યૈનાં સ્વજલકણિકાશીતલેનાઽનિલેન ॥ ૯॥ (Megha 103a) var તામુત્થાપ્ય

કીર્તિં ચ સ્વાં કુરુ કુસુમિતાં સ્વોદ્યમામ્બુપ્રસેકૈઃ
સદ્વલ્લીં વા પ્રધનવિષયૈરુન્નતાનાં ક્રમોઽયમ્ ।
કુર્યાત્ કિન્નો નવજલમુચાં કું ક્ષતાન્તામનેહા
પ્રત્યાશ્વસ્તાં સમમભિનવૈર્જાલકૈર્માલતીનામ્ ॥ ૧૦॥ (Megha 103b)

મત્પ્રાતીપ્યં સમરશિરસિ પ્રાપ્ય દૃષ્ટાવદાનઃ
ક્ષીણાયુસ્ત્વં કુરુ સુરવધૂં કાઞ્ચિદાપૂર્ણકામામ્ ।
ધામારોહન્સહજમણિભાભૂષિતોઽમ્ભોદ યા
વિદ્યુદ્ગર્ભઃ સ્તિમિતનયનાં ત્વત્સનાથે ગવાક્ષે ॥ ૧૧॥ (Megha 103c)

યદ્યેતત્તેઽધ્યવસિતમતિપ્રૌઢમાનોદ્ધુરસ્ય
ધ્યાનાભ્યાસં શિથિલય તતો યોદ્ધુકામો નિકામમ્ ।
અસ્યુત્ખાતઃ પટુતરગિરં પ્રોજ્ઝ્ય વાચંયમત્વં
વક્તું ધીરં સ્તનિતવચનો માનિનીં પ્રક્રમેથાઃ ॥ ૧૨॥ (Megha 103d) var ધીરસ્તનિતવચનૈર્માનિનીં

ભીતે શસ્ત્રં યદિ ભટમતે વાવહીમ્યસ્ત્રશૂન્યે
સ્ત્રીમ્મન્યે વા ચરણપતિતે ક્ષીણકે વા સ કશ્ચિત્ ।
પાદસ્પૃષ્ટ્યા શપથયતિ વા જાતુ હિંસાં ભુજિષ્યં
ભર્તુર્મિત્રં પ્રિયમભિદધે વિદ્ધિ મામમ્બુવાહમ્ ॥ ૧૩॥ (Megha 104a) var પ્રિયમવિધવે

તન્મા ભૈષીર્વિહતગરિમા હસ્તમુત્ક્ષિપ્ય પાદા-
વાશ્લિષ્ય ત્વં મમ યદિ ચ તે જીવનેऽસ્ત્યુત્સુકત્વમ્ ।
કિઞ્ચિત્પ્રીત્યૈ પ્રિયયુવતિતો માऽન્યથા ત્વં ગૃહીર્મા
તત્સન્દેશૈર્મનસિ નિહિતૈરાગતં ત્વત્સમીપમ્ ॥ ૧૪(Megha 104b)
var તત્સન્દેશૈહૃદયનિહિતૈરાગતં

સદ્યઃ કૢપ્તો જલદસમયો યો મયાકાલમેઘૈ-
રારુદ્ધદ્યુર્વ્યવધિ સહસા સોऽપ્યનેનાત્મશક્ત્યા।
ધ્વાન્તસ્યૈવ પ્રતિનિધિરહો યોષિતાં જીવનાર્થં
યો વૃન્દાનિ ત્વરયતિ પથિ શ્રામ્યતાં પ્રોષિતાનામ્ ॥ ૧૫॥ (Megha 104c)

સોऽયં યોગી પ્રકટમહિમા લક્ષ્યતે દુર્વિભેદો
વિદ્યાસિદ્ધો ધ્રુવમભિમના યન્મમાપ્યાત્તનાશા ।
કર્તું શક્તા નવઘનઘટા યા મનાંસ્યધ્વગાનાં
મન્દ્રસ્નિગ્ધૈર્ધ્વનિભિરબલાવેણિમોક્ષોત્સુકાનિ ॥ ૧૬॥ (Megha 104d)

ઇત્યાધ્યાયન્પુનરપિ મુનિં સોऽભણીદ્યુદ્ધશૌણ્ડો
વીરશ્રીસ્ત્વામિહ વનતરૌ મન્મથાક્લેશમુક્તા ।
પશ્યન્ત્યાસ્તે દશમુખપુરોદ્યાનવૃક્ષે સતી સ્યા-
દિત્યાખ્યાતે પવનતનયં મૈથિલીવોન્મુખી સા ॥ ૧૭॥ (Megha 105a)

સઙ્ખ્યે સઙ્ખ્યં સુભટવિષયાં પૂરયન્નસ્મદીયે
હિત્વા ભીતિં ત્વમધિશયિતો વીરશય્યાં યદા સ્યાઃ ।
પ્રત્યાસીદત્યપિહિતરસા વીરલક્ષ્મીસ્તદૈષા
ત્વામુત્કણ્ઠોચ્છ્વસિતહૃદયા વીક્ષ્ય સમ્ભાવ્ય ચૈવ ॥ ૧૮॥ (Megha 105b)

મન્યે શ્રોત્રં પરુષપવનૈર્દૂષિતં તે મદુક્તાં
વ્યક્તાકૂતાં સમરવિષયાં સદ્કથાં નો શ઼ૃણોતિ ।
તત્પારુષ્યપ્રહરણમિદં ભેષજં વિદ્ધિ ગેયં
શ્રોષ્યત્યસ્માત્પરમવહિતં સૌમ્ય સીમન્તિનીનામ્ ॥ ૧૯॥ (Megha 105c)

var શ્રોષ્યત્યસ્માત્પરમવહિતા

શ્રવ્યં ગેયં નયનસુભગં રૂપમાલોકનીયં
પેયસ્તાસાં વદનસુરભિઃ સ્પૃશ્યમાઘ્રાયમઙ્ગમ્ ।
કામાઙ્ગં તે સમુચિતમિદં સઙ્ગમં સાનુબન્ધં
કાન્તોપાન્તાત્સુહૃદુપગમઃ સઙ્ગમાત્કિઞ્ચિદૂનઃ ॥ ૨૦॥ (Megha 105d)
var કાન્તોદન્તઃ સુહૃદુપનતઃ

તસ્માદ્વાસઃ કિસલયમૃદુ ત્વં મુખસ્થાયિ દિવ્યં
તામ્બૂલં ચ પ્રણયમચિરાદ્ઘોષિતાં માનયોચ્ચૈઃ।
વ્યર્થક્લેશાં વિસૃજ વિરસામાર્યવૃત્તિં મુનીનાં
તામાયુષ્મન્મમ ચ વચનાદાત્મનશ્ચોપકર્તુમ્ ॥ ૨૧॥ (Megha 106a)

શ્રેયોમાર્ગઃ કિલ મુનિવરૈઃ સેવ્યતે મોક્ષહેતોઃ
સૌખ્યં દ્વેધા સુરયુવતિજં મુક્તિલક્ષ્મ્યાશ્રયં ચ ।
દૂરે મુક્તિઃ સુલભમિતરત્સેવમન્યોઽપિ વિદ્વાન્
બ્રૂયાદેવં તવ સહચરો રામગિર્યાશ્રમસ્થઃ ॥ ૨૨॥ (Megha 106b)

વિદ્યુદ્વલ્લીવિલસિતનિભાઃસમ્પદશ્ચઞ્ચલત્વાત્
લબ્ધાભોગાઃ નિયતવિપદસ્તત્ક્ષણાદેવ ભોગાઃ ।
તસ્માલ્લોકઃ પ્રણયિનિ જને સ્થાસ્નુભાવવ્યપાયાત્
અવ્યાપન્નઃ કુશલમબલે પૃચ્છતિ ત્વાં વિયુક્તઃ ॥ ૨૩॥ (Megha 106c)

તદ્ભોક્તવ્યે સ્વયમુપનતે શીતકત્વં સમુજ્ઝે-
ર્મૃત્યુવ્યાઘ્રો દ્રુતમનુપદી વામમન્વિચ્છતીતઃ ।
આયુષ્મત્વં કુશલકલિતં નન્વિહાશાધિ નિત્યં
પૂર્વાશાસ્યં સુલભવિપદાં પ્રાણિનામેતદેવ ॥ ૨૪॥ (Megha 106d) var પૂર્વાભાષ્યં

સૈષા બાલા પ્રથમકથિતા પૂર્વજન્મપ્રિયા તે
પશ્ચાયાતા રહસિ પરિરભ્યાઽનુમોદં નયેત્ત્વામ્ ।
અઙ્ગેનાઙ્ગં તનુ ચ તનુના ગાઢતપ્તેન તપ્તં (Megha 107a) var પ્રતનુ તનુના
સાસ્રેણાસ્રદ્રવમવિરતોત્કણ્ઠમુત્કણ્ઠિતેન ॥ ૨૫॥ (Megha 107b) var સાસ્રેણાશ્રુદ્રુતમવિરતોત્કણ્ઠમુત્કણ્ઠિતેન

દૂરાગાઢપ્રણયદિવસો મન્મથેનાઽતિભૂમિં
નીતો બિભ્યત્ત્વદભિસરણાદુત્સુકઃ સ્ત્રીજનસ્ત્વામ્ ।
ઉષ્ણોચ્છ્વાસં સમધિકતરોચ્છ્વાસિના દૂરવર્તી (Megha 107c)
સઙ્કલ્પૈસ્તૈર્વિશતિ વિધિના વૈરિણા રુદ્ધમાર્ગઃ ॥ ૨૬॥ (Megha 107d)

સોऽયં ત્વત્તઃ પ્રણયકણિકામપ્યલબ્ધ્વા વિલક્ષો
દૂરાત્સેવાં તવ વિતનુતે પશ્ય સાર્થો વધૂનામ્ ।
શબ્દાખ્યેયં યદપિ કિલ તે યઃ સખીનાં પુરસ્તાત્ (Megha 108a)
કર્ણે લોલઃ કથયિતુમભૂદાનનસ્પર્શલોભાત્ ॥ ૨૭॥ (Megha 108b)

યોऽસૌ સ્ત્રીણાં પ્રણયમધુરો ભાવગમ્યોऽધિકારઃ
કામાભિખ્યાં દધદવિરતં લોકરૂઢા પ્રસિદ્ધિઃ।
સોऽતિક્રાન્તઃ શ્રવણવિષયં લોચનાભ્યામદૃષ્ટ- (Megha 108c)
સ્ત્વામુત્કણ્ઠાવિરચિતપદં મન્મુખેનેદમાહ ॥ ૨૮॥ (Megha 108d)

યોગિન્ ! યોગપ્રણિહિતમનાઃ કિન્તરાં ધ્યેયશૂન્યં
ધ્યાયસ્યેવં સ્મર નનુ ધિયાऽધ્યક્ષવેદ્યં મતં નઃ ।
શ્યામાસ્વઙ્ગં ચકિતહરિણીપ્રેક્ષણે દૃષ્ટિપાતં (Megha 109a)
વક્ત્રચ્છાયા શશિનિ શિખિનાં બર્હભારેષુ કેશાન્ ॥ ૨૯॥ (Megha 109b) var વક્ત્રચ્છાયાં

પશ્યાऽऽમુષ્મિન્નવકિસલયે પાણિશોભાં નખાનાં
છાયામસ્મિન્ કુરવકવને સપ્રસૂને સ્મિતાનામ્ ।
લીલામુદ્યત્કુસુમિતલતામઞ્જરીષ્વસ્મદીયા-
મુત્પશ્યામિ પ્રતનુષુ નદીવીચિષુ ભ્રૂવિલાસાન્ ॥ ૩૦॥ (Megha 109c)

સાદૃશ્યં નઃ સ્ફુટમિતિ યથા દૃશ્યતે સર્વગામિ
ધ્યેયં સાક્ષાત્સુખફલમિદં યોગિનાં કામદાયિ ।
મિથ્યાધ્યાતેર્મુનિષુ વિધયે હે તપોલક્ષ્મિ તદ્વદ્
હન્તૈકસ્થં ક્વચિદપિ ન તે ચણ્ડિ સાદૃશ્યમસ્તિ ॥ ૩૧॥ (Megha 109d)
var હન્તૈકસ્મિન્ક્વચિદપિ ન તે ચણ્ડિ સાદ્રશ્યમસ્તિ

હા ધિઙ્ મૂઢિં યદયમૃષિપઃ ત્વામસાધ્વીમજાનન્
ત્વય્યાસક્તિં મુહુરુપગતોऽસ્માસ્વનાદર્યભૂય્ય ।
ચેતોમય્યાં યદનુકમિતાં ધ્યાયતિ પ્રેયસીં વા
ત્વામાલિખ્ય પ્રણયકુપિતાં ધાતુરાગૈઃ શિલાયામ્ ॥ ૩૨॥ (Megha 110a) var પ્રણયકુપિતા

ભો ભો સાધો મમ કુરુ દયાં દેહિ દૃષ્ટિં પ્રસીદ
પ્રાયઃ સાધુર્ભવતિ કરુણાર્દ્રીકૃતસ્વાન્તવૃત્તિઃ ।
યોગં તાવચ્છિથિલય મનાક્ પ્રાર્થનાચાટુકારૈઃ
આત્માનં તે ચરણપતિતં યાવદિચ્છામિ કર્તુમ્ ॥ ૩૩॥ (Megha 110b)

ત્વત્સાદૃશ્યં મનસિ ગુણિતં કામુકીનાં મનોહૃત્
કામાબાધાં લઘયિતુમથો દ્રષ્ટુકામા વિલિખ્ય ।
યાવત્પ્રીત્યા કિલ બહુરસં નાથ પશ્યામિ કોષ્ણૈ-
રસ્રૈસ્તાવન્મુહુરુપચિતૈર્દૃષ્ટિરાલુપ્યતે મે ॥ ૩૪॥ (Megha 110c)

તીવ્રાવસ્થે તપતિ મદને પુષ્પબાણૈર્મદઙ્ગં
તલ્પેઽનલ્પં દહતિ ચ મુહુઃ પુષ્પભેદૈઃ પ્રક્લૃપ્તે ।
તીવ્રાપાયા ત્વદુપગમનં સ્વપ્નમાત્રેઽપિ નાઽઽપં
ક્રૂરસ્તસ્મિન્નપિ ન સહતે સઙ્ગમં નૌ કૃતાન્તઃ ॥ ૩૫॥ (Megha 110d)

મામાકાશપ્રણિહિતભુજં નિર્દયાશ્લેષહેતો- (Megha 111a)
રુત્તિષ્ઠાસું ત્વદુપગમનપ્રત્યયાત્સ્વપ્નજાતાત્ ।
સખ્યો દૃષ્ટ્વા સકરુણમૃદુવ્યાવહાસીં દધાનાઃ
કામોન્મુગ્ધાઃસ્મરયિતુમહો સંશ્રયન્તે વિબુદ્ધામ્ ॥ ૩૬॥

નિદ્રાસઙ્ગાદુપહિતરતેર્ગાઢમાશ્લેષવૃત્તે -
ર્લબ્ધાયાસ્તે કથમપિ મયા સ્વપ્નસન્દર્શનેષુ (Megha 111b)
વિશ્લેષસ્સ્યાદ્વિહિતરુદિતૈરાધિજૈરાશુબોધૈઃ
કામોઽસહ્યં ઘટયતિતરાં વિપ્રલમ્ભાવતારામ્ ॥ ૩૭॥

તાં તાં ચેષ્ટાં રહસિ નિહિતાં મન્મથેનાઽસ્મદઙ્ગે
ત્વત્સમ્પર્કસ્થિરપરિચયાવાપ્તયે ભાવ્યમાનામ્ ।
પશ્યન્તીનાં ન ખલુ બહુશો ન સ્થલીદેવતાનાં (Megha 111c)
મુક્તાસ્થૂલાસ્તરુકિસલયેષ્વશ્રુલેશાઃ પતન્તિ ॥ ૩૮॥ (Megha 111d)

સઙ્ક્ષિપ્યેત ક્ષણમિવ કથં દીર્ઘયામા ત્રિયામા (Megha 113a)
var ક્ષણ ઇવ
પ્રાણાધીશે વિધિવિઘટિતે દૂરવર્તિન્યભીષ્ટે ।
ઇત્થં કામાકુલિતહૃદયા ચિન્તયન્તી ભવન્તં
પ્રાણારક્ષં શ્વસિમિ બહુશશ્ચક્રવાકીવ તપ્તા ॥ ૩૯॥

જ્યોત્સ્નાપાતં મમ વિપહિતું નોતરાં શક્નુવન્ત્યાઃ
સર્વાવસ્થાસ્વહરપિ કથં મન્દમન્દાતપં સ્યાત્ । (Megha 113b)
આચિત્તેશપ્રથમપરિરમ્ભોદયાદિત્યભીક્ષ્ણં
ધ્યાયામીદં મદનપરતાસર્વચિન્તાનિદાનમ્ ॥ ૪૦॥

કામાવેશો મહતિ વિહિતોત્કણ્ઠમાબાધમાને

ત્વય્યાસક્તિં ગતમનુગતપ્રાણમેતદ્દ્વયં ચ ।
ઇત્થં ચેતશ્ચટુલનયને દુર્લભપ્રાર્થનં મે (Megha 113c)
ગાઢોષ્ણાભિઃ કૃતમશરણં ત્વદ્વિયોગવ્યથાભિઃ ॥ ૪૧॥ (Megha 113d) var ગાઢોષ્માભિઃ

તાનપ્રાક્ષં મદનવિવશા યુષ્મદીયપ્રવૃત્તિં
પ્રત્યાવૃત્તાન્ હિમવદનિલાન્ કાતરા મત્સમીપમ્ ।
ભિત્ત્વા સદ્યઃ કિસલયપુટાન્દેવદારુદ્રુમાણાં (Megha 112a)
યે તત્ક્ષીરસ્રુતિસુરભયો દક્ષિણેન પ્રવૃત્તાઃ ॥ ૪૨॥ (Megha 112b)

ઇષ્ટે વસ્તુન્યતિપરિચિતં યત્તદપ્યઙ્ગનાનાં
પ્રીતેર્હેતુર્ભવતિ નિયતં યત્ત્વદઙ્ગાનુરોધાત્ ।
આલિઙ્ગ્યન્તે ગુણવતિ મયા તે તુષારાદ્રિવાતાઃ (Megha 112c)
પૂર્વં સ્પૃષ્ટં યદિ કિલ ભવેદઙ્ગમેભિસ્તવેતિ ॥ ૪૩॥ (Megha 112d)
var પૂર્વસ્પૃષ્ટં

તન્મે વીર પ્રતિવચનકં દેહિ યુક્તં વૃથાશાં
મા કાર્ષીર્મા યદિ ચ રુચિતં તે તદાભાષ્યમેતત્ ।
નન્વાત્માનં બહુ વિગણયન્નાત્મનૈવાડવલમ્બે (Megha 114a)
તત્કલ્યાણિ ત્વમપિ નિતરાં મા ગમઃ કાતરત્વમ્ ॥ ૪૪॥ (Megha 114b)

એવં પ્રાયાં નિકૃતિમસુરઃ સ્ત્રીમયીમાશુ કુર્વન્
વ્યર્થોદ્યોગઃ સમજનિ મુનૌ પ્રત્યુતાડગાત્સ દુઃખમ્ ।
કસ્યૈકાન્તં સુખમુપનતં દુઃખમેકાન્તતો વા (Megha 114c)
var કસ્યાત્યન્તં
નીચૈર્ગચ્છત્યુપરિ ચ દશા ચક્રનેમિક્રમેણ ॥ ૪૫॥ (Megha 114d)

યસ્મિન્કાલે સમજનિ મુનેઃ કેવલજ્ઞાનસમ્પ-
દ્યસ્મિન્દૈત્યો ગિરિમુદહરન્મૂર્ધ્નિ ચિક્ષેપ્સુરસ્ય ।
તત્કાલે સા શરદુદભવદ્વક્તુકામેતિ વોચ્ચૈઃ
શાપાન્તો મે ભુજગશયનાદુત્થિતે શાર્ઙ્ગપાણૌ ॥ ૪૬॥ (Megha 115a)

જ્યોત્સ્નાહાસં દિશિ દિશિ શરત્તન્વતી પ્રાદુરાસી-
દ્દૈત્યસ્યાડસ્ય પ્રહસિતુમિવાજ્ઞાનવૃત્તિં દુરન્તામ્ ।
વૈમલ્યેન સ્ફુતમિતિ દિશાં રુન્ધતીવોષ્ણકાલં
માસાનન્યાન્ગમય ચતુરો લોચને મીલયિત્વા ॥ ૪૭॥ (Megha 115b)
var શેષાન્માસાન્ ગમય

જાતાકમ્પાસનનિયમિતઃ સાવધિર્નાગરાજઃ
કાન્તાં સ્માઽઽહ પ્રથમમધિપં પૂજયાવોઽદ્ય ગત્વા ।
પશ્ચાદાવાં વિરહગુણિતં તં તમાત્માભિલાષં (Megha 115c)
નિર્વેક્ષ્યાવઃ પરિણતશરચ્ચન્દ્રિકાસુ ક્ષપાસુ ॥ ૪૮॥ (Megha 115d)

પ્રસ્થાનેઽસ્ય પ્રહતપટહે દિવ્યયાનાવકીર્ણે
કશ્ચિત્કાન્તાં તદનુગજનઃ સસ્મિતં વીક્ષતે સ્મ ।
ભૂયશ્ચાહ ત્વમપિ શયને કણ્ઠલગ્ના પુરા મે (Megha 116a)
નિદ્રાં ગત્વા કિમપિ રુદતી સસ્વનં વિપ્રબુદ્ધા ॥ ૪૯॥ (Megha 116b)

યત્તદ્વૃત્તં સ્મરસિ મામુપાલબ્ધુકામા
મન્યે ત્વીષત્કુપિતમિવ મે દર્શયન્તી પ્રપાસિ ।
સાન્તર્હાસં કથિતમસકૃત્પૃચ્છતોઽસિ ત્વયા મે (Megha 116c) var કથિતમસકૃત્પૃચ્છતશ્ચ
દૃ્ષ્ટઃ સ્વપ્ને કિતવ રમયન્કામપિ ત્વં મયેતિ ॥ ૫૦॥ (Megha 116d)

દૃષ્ટ્વાઽહીન્દ્રં સ્થિતમધિજિનં સત્સપર્યં સજાનિં
પ્રારેભેઽસૌ સભયમસુરો મુક્તશૈલોઽપયતુમ્ ।
રુદ્ધશ્ચૈવં ધરણપતિના ભો ભવાન્માઽપયાસી-
દેતસ્માન્માં કુશલિનમભિજ્ઞાનદાનાદ્વિદિત્વા ॥ ૫૧॥ (Megha 117a)

દેવસ્યાઽસ્ય પ્રિયસહજકઃ પૂર્વજન્મન્યભૂસ્ત્વં
સ્ત્રીકામ્યંસ્તં પ્રસભમવધીર્વૈરકામ્યંસ્તદૈનમ્ ।
તત્તે મૌઢ્યાત્કૃતમનુચિતં મર્ષિતં ન ત્વયાઽપિ
મા કૌલીનાદસિતનયને મય્યવિશ્વાસિની ભૂઃ ॥ ૫૨॥ (Megha 117b) var કૌલીનાચ્ચકિતનયને

ધિક્કૃત્યૈનં મુહુરથ સજૂકૃત્ય તં સોઽહિરાજો
ભક્ત્યા ભર્તુશ્ચરણયુગલે પ્રાણમત્સ્નેહનિઘ્નઃ ।
સ્નેહાનાહુઃ કિમપિ વિરહે હ્રાસિનસ્તેઽપ્યભોગા- (Megha 117c)
var ધ્વંસિનસ્તે ત્વભોગાદ્
દિષ્ટે વસ્તુન્યુપચિતરસાઃ પ્રેમરાશીભવન્તિ ॥ ૫૩॥ (Megha 117d)

સઙ્ક્ષેપાચ્ચ સ્તુતિમુરગરાટ્ કર્તુમારબ્ધ ભર્તુઃ
શ્રેયસ્સૂતે ભવતિ ભગવન્ભક્તિરલ્પાપ્યનલ્પમ્ ।
શ્રેયસ્કામા વયમત ઇતો ભોગિની નોઽનુકૂલા-
માશ્વાસ્યૈનાં પ્રથમવિરહે શોકદષ્ટે સખીં તે ॥ ૫૪(Megha 118a) var આશ્વાસ્યૈવં પ્રથમવિરહોદગ્રશોકાં

સૈષા સેવાં ત્વયિ વિદધતઃ શ્રેયસે મે દુરાપં

યન્માહાત્મ્યાત્પદમધિગતં કાન્તયાऽમા મયેદમ્ ।
યસ્માચ્ચૈનં તદનુચરણેનાऽહમુજ્ઝન્વિહારં
તસ્માદદ્રેસ્ત્રિનયનવૃષોત્ખાતકૂટાન્નિવૃત્તઃ ॥ ૫૫ ॥ (Megha 118b)
var શૈલાદાશુ ત્રિનયવૃષોત્ખાતકૂટાન્નિવૃત્તઃ

તન્મે દેવ શ્રિયમુપરિમાં તન્વતીયં ત્વદઙ્ઘ્રો-
ર્ભક્તિર્ભૂયાન્નિખિલસુખદા જન્મનીહાऽપ્યમુત્ર ।
કાન્તાસઙ્ગૈરલમઘવશાદ્ ગૃધ્નુતં વર્ધયદ્ભિઃ
સાભિજ્ઞાનં પ્રહિતવચનૈસ્તત્ર યુક્તૈર્મમાऽપિ ॥ ૫૬ ॥ (Megha 118c) var
સાભિજ્ઞાનપ્રહિતકુશલૈસ્તદ્વચોભિર્મમાપિ

ભૂયો યાચે સુરનુત મુને ત્વામુપારૂઢભક્તૌ
દૈત્યે ચાऽસ્મિન્પ્રણયમધુરાં દેહિ દૃષ્ટિં પ્રસીદ ।
ચિત્તોદ્વેગૈરનુશયકૃતૈશ્ચાસ્ય ગાત્રાત્પ્રપિત્સુ
પ્રાતઃ કુન્દપ્રસવશિથિલં જીવિતં ધારયેદમ્ ॥ ૫૭ ॥ (Megha 118d)

સ્તુત્યન્તેऽસૌ વ્યરચયદિવ ચ્છત્રમુચ્ચૈઃ ફણાલિં
ભર્તુર્ભક્ત્યા દધદધિશિરઃ સ્વાં વિતત્ય પ્રમોદાત્ ।
વ્યાત્તૈર્વક્ત્રૈર્ધ્રુવમિતિ મુનિં વક્તુકામસ્તદાનીં
કચ્ચિત્સોમ્ય વ્યવસિતમિદં બન્ધુકૃત્યં ત્વયા મે ॥ ૫૮ ॥ (Megha 119a)

દેવી ચાऽસ્ય પ્રચલદલકા લોલનેત્રેન્દુવક્ત્રા
દિવ્યં છત્રં વ્યરચદહો ધૈર્યમિત્યાલપન્તી ।
દૈત્યસ્યાऽદ્રેર્યદભિદલનં શક્તિયોગેऽપિ કર્તું
પ્રત્યાદેશાન્ન ખલુ ભવતો ધીરતાં કલ્પયામિ ॥ ૫૯ ॥ (Megha 119b)

તચ્છાયાયાં સમધિકરુચિં દેવમુત્પન્નબોધં
બધ્દ્વાસ્થાનં શરણમકૃત ત્યક્તવૈરઃ સ દૈત્યઃ।
શ્રેયોऽસ્મભ્યં સમભિલષિતં વારિવાહો યથા ત્વં
નિઃશબ્દોऽપિ પ્રદિશસિ જલં યાચિતશ્ચાતકેભ્યઃ ॥ ૬૦ ॥ (Megha 119c)

પ્રત્યુત્કીર્ણો યદિ ચ ભગવન્ભવ્યલોકૈકમિત્રાત્
ત્વત્તઃ શ્રેયઃ ફલમભિમતં પ્રાપ્નુયાદેવ ભક્તઃ ।
પ્રત્યુક્તૈઃ કિં ફલતિ જગતે કલ્પવૃક્ષઃ ફલાનિ
પ્રત્યુક્તં હિ પ્રણયિષુ સતામીપ્સિતાર્થક્રિયૈવ ॥ ૬૧ ॥ (Megha 119d)

સહ્રીકસ્તે કથમપિ પુરો વર્તિતું સન્ઘટેऽહં

દૂરાદ્ભક્તું નિકૃતિબહુલઃ પાપકૃદ્વૈરદગ્ધઃ ।
સૌજન્યસ્ય પ્રકટય પરાં કોટિમાત્મન્યસઙ્ગાત્
એતત્કૃત્વા પ્રિયમનુચિતં પ્રાર્થનાદાત્મનો મે ॥ ૬૨॥ (Megha 120a)
var પ્રિયમનુચિતપ્રાર્થનાવર્ત્મનો

અત્રાણં મામપઘૃણમતિપ્રૌઢમાયં દુરીહં
પશ્ચાત્તાપાચ્ચરણપતિતં સર્વસત્ત્વાનુકમ્પ ।
પાપાપેતં કુરુ સકરુણં ત્વાઽદ્ય યાચે વિનમ્રઃ
સૌહર્દાદ્વા વિધુર ઇતિ વા મય્યનુક્રોશબુદ્ધ્યા ॥ ૬૩॥ (Megha 120b)

ઇત્થઙ્કારં કમઠદનુજઃ સ્વાપકારં પ્રમાર્જન્
ભૂયઃ સ્માઽઽહ પ્રકટિતમહાભોગભોગીન્દ્રગૂઢઃ।
લોકાહ્લાદી નવ ઇવ ઘનો દેવ ધર્મામ્બુ વર્ષ-
ન્નિષ્ટાન્દેશાન્વિચર જલદ પ્રાવૃષા સંભૃતશ્રીઃ ॥ ૬૪॥ (Megha 120c)

યત્તન્મૌઢ્યાદ્બહુવિલસિતં ન્યાયમુલ્લઙ્ઘ્ય વાચાં
તન્મે મિથ્યા ભવતુ ચ મુને દુષ્કૃતં નિન્દિતસ્વમ્ ।
ભક્ત્યા પાદૌ જિન વિનમતઃ પાર્શ્વ મે તત્પ્રસાદાત્
મા ભૂદેવં ક્ષણમપિ ચ તે વિદ્યુતા વિપ્રયોગઃ ॥ ૬૫॥ (Megha 120d)

Here ends the SamasyA part from MeghadUtam

અનુનયતિ સતીથં ભક્તિનમ્રેણ મૂર્ધ્ના
કમઠદનુજનાથે નાગરાજન્યસાક્ષાત્ ।
ધ્રુવમનુશયતપ્તાદ્વૈરબન્ધશ્ચિરાત્તઃ
સ્મ ગલતિ નિજચિત્તાત્સન્તતાશ્રુચ્છલેન ॥ ૬૬॥

અથ સુરભિસમીરાન્દોલિતૈઃ કલ્પવૃક્ષૈઃ
સમમમરનિકાયાઃ પુષ્પવૃષ્ટિં વિતેનુઃ।
અવિરલનિપતદ્ભિઃ સ્વર્વિમાનૈર્નિરુદ્ધા
નવજલદવિલિપ્તેવેક્ષ્યતાઽસૌ તદા દ્યૌઃ ॥ ૬૭॥

સપદિ જલદમુક્તૈઃ સાન્દ્રગન્ધામ્બુપાતૈઃ
મધુપગણવિકીર્ણૈરાશ્વસત્ક્ષ્મા ક્ષતોષ્મા-
વિયતિ મધુરમુચ્ચૈર્દુન્દુભીનાં ચ નાદઃ
સુરકરતલગૂઢાસ્ફાલિતાનાં જજૃમ્ભે ॥ ૬૮॥

ઇતિ વિદિતમહાર્દ્ધિં ધર્મસામ્રાજ્યમિન્દ્રાઃ
જિનમવનતિભાજો ભેજિરે નાકભાજામ્ ।
શિથિલિતવનવાસાઃ પ્રાક્તનીં પ્રોજ્ઝ્ય વૃત્તિં
શરણમુપયુયુસ્તં તાપાસા ભક્તિનમ્રાઃ ॥ ૬૯ ॥

ઇતિ વિરચિતમેતત્કાવ્યમાવેષ્ટ્ય મેઘં
બહુગુણમપદોષં કાલિદાસસ્ય કાવ્યમ્ ।
મલિનિતપરકાવ્યં તિષ્ઠતાદાશશાઙ્કં
ભુવનમવતુ દેવસ્સર્વદા ઘવર્ષઃ ॥ ૭૦ ॥

શ્રીવીરસેનમુનિપાદપયોજભૃઙ્ગઃ
શ્રીમાનભૂદ્વિનયસેનમુનિર્ગરીયાન્ ।
તચ્ચોદિતેન જિનસેનમુનીશ્વરેણ
કાવ્યં વ્યધાયિ પરિવેષ્ટિતમેઘદૂતમ્ ॥ ૭૧ ॥

॥ ઇત્યમોઘવર્ષપરમેશ્વરપરમગુરુશ્રીજિનસેનચાર્યવિરચિતમેઘદૂતવેષ્ટિતે
શ્રીપાર્શ્વાભ્યુદયે ભગવત્કૈવલ્યવર્ણનો નામ ચતુર્થઃ સર્ગઃ ॥

Based on this work, the following is the version of KAlidAsa's MeghadUtam, that was vogue during that period. Here, "Megha" refers to the book: "Complete Works of Kalidasa", edited by V P Joshi

કશ્ચિત્ કાન્તાવિરહગુરુણા સ્વાધિકારાત્પ્રમત્તઃ ॥ ૧ ॥ (Megha 1a)
શાપેનાસ્તઙ્ગમિતમહિમા વર્ષભોગ્યેણ ભર્તુઃ ॥ ૨ ॥ (Megha 1b)
યક્ષશ્ચક્રે જનકતનયાસ્નાનપુણ્યોદકેષુ ॥ ૩ ॥ (Megha 1c)
સ્નિગ્ધચ્છાયાતરુષુ વસતિં રામગિર્યાશ્રમેષુ ॥ ૪ ॥ (Megha 1d)
તસ્મિન્નદ્રૌ કતિચિદબલાવિપ્રયુક્તઃ સ કામી ॥ ૫ ॥ (Megha 2a)
નીત્વા માસાન્ કનકવલયભ્રંશરિક્તપ્રકોષ્ઠઃ ॥ ૬ ॥ (Megha 2b)
આષાઢસ્ય પ્રથમદિવસે મેઘમાશ્લિષ્ટસાનુમ્ ॥ ૭ ॥ (Megha 2c)
વપ્રક્રીડાપરિણતગજપ્રેક્ષણીયં દદર્શ ॥ ૮ ॥ (Megha 2d)
તસ્ય સ્થિત્વા કથમપિ પુરઃ કૌતુકાધાનહેતોઃ ॥ ૯ ॥ (Megha 3a)
અન્તર્બાષ્પશ્ચિરમનુચરો રાજરાજસ્ય દધ્યૌ ॥ ૧૦ ॥ (Megha 3b)
મેઘાલોકે ભવતિ સુખિનોઽપ્યન્યથાવૃત્તિ ચેતઃ ॥ ૧૧ ॥ (Megha 3c)
કણ્ઠાશ્લેષપ્રણયિનિ જને કિં પુનર્દૂરસંસ્થે ॥ ૧૨ ॥ (Megha 3d)
પ્રત્યાસન્ને નભસિ દયિતાજીવિતાલમ્બનાર્થી ॥ ૧૩ ॥ (Megha 4a)

જીમૂતેન સ્વકુશલમયીં હારયિષ્યન્ પ્રવૃત્તિમ્ ॥ ૧૪ ॥ (Megha 4b)
સ પ્રત્યગ્રૈઃ કુટજકુસુમૈઃ કલ્પિતાર્ઘાય તસ્મૈ ॥ ૧૫ ॥ (Megha 4c)
પ્રીતઃ પ્રીતિપ્રમુખવચનં સ્વાગતં વ્યાજહાર ॥ ૧૬ ॥ (Megha 4d)
ધૂમજ્યોતિઃ સલિલમરુતાં સન્નિપાતઃ ક્વ મેઘઃ ॥ ૧૭ ॥ (Megha 5a)
સન્દેશાર્થાઃ ક્વ પટુકરણૈઃ પ્રાણિભિઃ પ્રાપણીયાઃ ॥ ૧૮ ॥ (Megha 5b)
ઇત્યૌત્સુક્યાદપરિગણયન્ ગુહ્યકસ્તં યયાચે ॥ ૧૯ ॥ (Megha 5c)
કામાર્તા હિ પ્રકૃતિકૃપણાશ્ચેતનાચેતનેષુ ॥ ૨૦ ॥ (Megha 5d)
જાતં વંશે ભુવનવિદિતે પુષ્કરાવર્તકાનામ્ ॥ ૨૧ ॥ (Megha 6a)
જાનામિ ત્વાં પ્રકૃતિપુરુષં કામરૂપં મઘોનઃ ॥ ૨૨ ॥ (Megha 6b)
તેનાઽર્થિત્વં ત્વયિ વિધિવશાદ્દૂરબન્ધુર્ગતોઽહમ્ ॥ ૨૩ ॥ (Megha 6c)
યાચ્ઞા મોઘા વરમધિગુણે નાધમે લબ્ધકામા ॥ ૨૪ ॥ (Megha 6d)
સન્તપ્તાનાં ત્વમસિ શરણં તત્ પયોદપ્રિયાયાઃ ॥ ૨૫ ॥ (Megha 7a)
સન્દેશં મે હર ધનપતિક્રોધવિશ્લેષિતસ્ય ॥ ૨૬ ॥ (Megha 7b)
ગન્તવ્યા તે વસતિરલકા નામ યક્ષેશ્વરાણામ્ ॥ ૨૭ ॥ (Megha 7c)
બાહ્યોદ્યાનસ્થિતહરશિરશ્ચન્દ્રિકા ધૌતહર્મ્યા ॥ ૨૮ ॥ (Megha 7d)
ત્વામારૂઢં પવનપદવીમુદ્ગૃહીતાલકાન્તાઃ ॥ ૨૯ ॥ (Megha 8a)
પ્રેક્ષિષ્યન્તે પથિકવનિતાઃ પ્રત્યયાદાશ્વસન્ત્યઃ ॥ ૩૦ ॥ (Megha 8b)
કઃ સન્નદ્ધે વિરહવિધુરાં ત્વય્યુપેક્ષેત જાયામ્ ॥ ૩૧ ॥ (Megha 8c)
ન સ્યાદન્યોઽપ્યહમિવ જનો યઃ પરાધીનવૃત્તિઃ ॥ ૩૨ ॥ (Megha 8d)
તાં ચાઽવશ્યં દિવસગણનાતત્પરામેકપત્નીમ્ ॥ ૩૩ ॥ (Megha 9a)
મવ્યાપન્નામવિહતગતિર્દ્રક્ષ્યસિ ભ્રાતૃજાયામ્ ॥ ૩૪ ॥ (Megha 9b)
આશાબન્ધઃ કુસુમસદૃશં પ્રાયશો હ્યઙ્ગનાનામ્ ॥ ૩૫ ॥ (Megha 9c)
સદ્યઃપાતિ પ્રણયિહૃદયં વિપ્રયોગે રુણદ્ધિ ?॥ ૩૬ ॥ (Megha 9d)
મન્દં મન્દં નુદતિ પવનશ્ચાનુકૂલો યથા ત્વામ્ ॥ ૩૭ ॥ (Megha 10a)
વામશ્ચાયં નદતિ મધુરં ચાતકસ્તે સગન્ધઃ ॥ ૩૮ ॥ (Megha 10b)
ગર્ભાધાનક્ષણપરિચયાન્નૂનમાબદ્ધમાલાઃ ॥ ૩૯ ॥ (Megha 10c)
સેવિષ્યન્તે નયનસુભગં ખે ભવન્તં બલાકાઃ ॥ ૪૦ ॥ (Megha 10d)
કર્તું યચ્ચ પ્રભવતિ મહીમુચ્છિલીન્ધ્રામવન્ધ્યામ્ ॥ ૪૧ ॥ (Megha 11a)
તચ્છ્રુત્વા તે શ્રવણસુભગં ગર્જિતં માનસોત્કાઃ ॥ ૪૨ ॥ (Megha 11b)
આકૈલાસાદ્બિસકિસલયચ્છેદપાથેયવન્તઃ ॥ ૪૩ ॥ (Megha 11c)
સમ્પત્સ્યન્તે નભસિ ભવતો રાજહંસાઃ સહાયાઃ ॥ ૪૪ ॥ (Megha 11d)
આપૃચ્છસ્વ પ્રિયસખમમું તુઙ્ગમાલિઙ્ગ્ય શૈલમ્ ॥ ૪૫ ॥ (Megha 12a)

વન્દ્યૈઃ પુંસાં રઘુપતિપદૈરઙ્કિતં મેખલાસુ ॥ ૪૬॥ (Megha 12b)
કાલે કાલે ભવતિ ભવતો યસ્ય સંયોગમેત્ય ॥ ૪૭॥ (Megha 12c)
સ્નેહવ્યક્તિશ્ચિરવિરહજં મુઞ્ચતો બાષ્પમુષ્ણમ્ ॥ ૪૮॥ (Megha 12d)
માર્ગં મત્તઃ શ્રુણુ કથયતસ્ત્વત્પ્રયાણાનુરૂપમ્ ॥ ૪૯॥ (Megha 13a)
સન્દેશં મે તદનુ જલદ શ્રોષ્યસિ શ્રવ્યબન્ધમ્ ॥ ૫૦॥ (Megha 13b)
ખિન્નઃ ખિન્નઃ શિખરિષુ પદં ન્યસ્ય ગન્તાસિ યત્ર ॥ ૫૧॥ (Megha 13c)
ક્ષીણઃ ક્ષીણઃ પરિલઘુપયઃ સ્રોતસાં ચોપભુજ્ય ॥ ૫૨॥ (Megha 13d)
રદ્રેઃ શ ્ૃઙ્ગં હરતિ પવનઃ કિંસ્વિદિત્યુન્મુખીભિઃ ॥ ૫૩॥ (Megha 14a)
દૃષ્ટોત્સાહશ્ચકિતચકિતં મુગ્ધસિદ્ધાઙ્ગનાભિઃ ॥ ૫૪॥ (Megha 14b)
સ્થાનાદસ્માત્સરસનિચુલાદુત્પતોદઙ્મુખઃ ખમ્ ॥ ૫૫॥ (Megha 14c)
દિઙ્નાગાનાં પથિ પરિહરન્ સ્થૂલહસ્તાવલેપાન્ ॥ ૫૬॥ (Megha 14d)
રત્નચ્છાયાવ્યતિકર ઇવ પ્રેક્ષ્યમેતત્પુરસ્તાત્ ॥ ૫૭॥ (Megha 15a)
વલ્મીકાગ્રાત્પ્રભવતિ ધનુઃ ખણ્ડમાખણ્ડલસ્ય ॥ ૫૮॥ (Megha 15b)
યેન શ્યામં વપુરતિતરાં કાન્તિમાપત્સ્યતે તે ॥ ૫૯॥ (Megha 15c)
બર્હેણેવ સ્ફુરિતરુચિના ગોપવેષસ્ય વિષ્ણોઃ ॥ ૬૦॥ (Megha 15d)
ત્વય્યાયત્તં કૃષિફલમિતિ ભ્રૂવિલાસાનભિજ્ઞૈઃ ॥ ૬૧॥ (Megha 16a)
પ્રીતિસ્નિગ્ધૈર્જનપદવધૂલોચનૈઃ પીયમાનઃ ॥ ૬૨॥ (Megha 16b)
સદ્યઃસીરોત્કષણસુરભિક્ષેત્રમારુહ્ય માલમ્ ॥ ૬૩॥ (Megha 16c)
કિઞ્ચિત્પશ્ચાદ્ વ્રજ લઘુગતિર્ભૂય એવોત્તરેણ ॥ ૬૪॥ (Megha 16d)
ત્વામાસારપ્રશમિતવનોપદ્રવં સાધુ મૂર્ધ્ના ॥ ૬૫॥ (Megha 17a)
વક્ષ્યત્યધ્વશ્રમપરિગતં સાનુમાનામ્રકૂટઃ ॥ ૬૬॥ (Megha 17b)
ન ક્ષુદ્રોઽપિ પ્રથમસુકૃતાપેક્ષયા સંશ્રયાય ॥ ૬૭॥ (Megha 17c)
પ્રાપ્તે મિત્રે ભવતિ વિમુખઃ કિં પુનર્યસ્તથોચ્ચૈઃ ॥ ૬૮॥ (Megha 17d)
છન્નોપાન્તઃ પરિણતફલદ્યોતિભિઃ કાનનામ્રૈઃ ॥ ૬૯॥ (Megha 18a)
ત્વય્યારૂઢે શિખરમચલઃ સ્નિગ્ધવેણીસવર્ણે ॥ ૭૦॥ (Megha 18b)
નૂનં યાસ્યત્યમરમિથુનપ્રેક્ષણીયામવસ્થામ્ ॥ ૭૧॥ (Megha 18c)
મધ્યે શ્યામઃ સ્તન ઇવ ભુવઃ શેષવિસ્તારપાણ્ડુઃ ॥ ૭૨॥ (Megha 18d)
તસ્મિન્ સ્થિત્વા વનચરવધૂભુક્તકુઞ્જે મુહૂર્તમ્ ॥ ૭૩॥ (Megha 19a)
તોયોત્સર્ગદ્રુતતરગતિસ્તત્પરં વર્ત્મ તીર્ણઃ ॥ ૭૪॥ (Megha 19b)
રેવાં દ્રક્ષ્યસ્યુપલવિષમે વિન્ધ્યપાદે વિશીર્ણામ્ ॥ ૭૫॥ (Megha 19c)
ભક્તિચ્છેદૈરિવ વિરચિતાં ભૂતિમઙ્ગે ગજસ્ય ॥ ૭૬॥ (Megha 19d)
યસ્યાસ્તિક્તૈર્વનગજમદૈર્વાસિતં વાન્તવૃષ્ટિઃ ॥ ૭૭॥ (Megha 20a)

જમ્બૂકુઞ્જપ્રતિહતરયં તોયમાદાય ગચ્છેઃ ॥ ૭૮ ॥ (Megha 20b)
અન્તઃસારં ઘન તુલયિતું નાઽનિલઃ શક્ષ્યતિ ત્વામ્ ॥ ૭૯ ॥ (Megha 20c)
રિક્તઃ સર્વો ભવતિ હિ લઘુઃ પૂર્ણતા ગૌરવાય ॥ ૮૦ ॥ (Megha 20d)
નીપં દૃષ્ટ્વા હરિતકપિશં કેસરૈરર્ધરૂઢૈઃ ॥ ૮૧ ॥ (Megha 21a)
આવિર્ભૂતપ્રથમમુકુલાઃ કન્દલીશ્ચાનુકચ્છમ્ ॥ ૮૨ ॥ (Megha 21b)
દગ્ધારણ્યેષ્વધિકસુરભિં ગન્ધમાઘ્રાય ચોર્વ્યાઃ ॥ ૮૩ ॥ (Megha 21c)
સારઙ્ગાસ્તે જલલવમુચઃ સૂચયિષ્યન્તિ માર્ગમ્ ॥ ૮૪ ॥ (Megha 21d)
દુત્પશ્યામિ દ્રુતમપિ સખે મત્પ્રિયાર્થં યિયાસોઃ ॥ ૮૫ ॥ (Megha 22a)
કાલક્ષેપં કકુભસુરભૌ પર્વતે પર્વતે તે ॥ ૮૬ ॥ (Megha 22b)
શુક્લાપાઙ્ગૈઃ સજલનયનૈઃ સ્વાગતીકૃત્ય કેકાઃ ॥ ૮૭ ॥ (Megha 22c)
પ્રત્યુદ્યાતઃ કથમપિ ભવાન્ ગન્તુમાશુ વ્યવસ્યેત્ ॥ ૮૮ ॥ (Megha 22d)
પાણ્ડુચ્છાયોપવનવૃતયઃ કેતકૈઃ સૂચિભિન્નૈઃ ॥ ૮૯ ॥ (Megha 23a)
નીડારમ્ભૈર્ગૃહબલિભુજામાકુલગ્રામચૈત્યાઃ ॥ ૯૦ ॥ (Megha 23b)
ત્વય્યાસન્ને પરિણતફલશ્યામજમ્બૂવનાન્તાઃ ॥ ૯૧ ॥ (Megha 23c)
સમ્પત્સ્યન્તે કતિપયદિનસ્થાયિહંસા દશાર્ણાઃ ॥ ૯૨ ॥ (Megha 23d)
તેષાં દિક્ષુ પ્રથિતવિદિશાલક્ષણાં રાજધાનીમ્ ॥ ૯૩ ॥ (Megha 24a)
ગત્વા સદ્યઃ ફલમપિ મહત્કામુકત્વસ્ય લબ્ધા ॥ ૯૪ ॥ (Megha 24b)
તીરોપાન્તસ્તનિતસુભગં પાસ્યસિ સ્વાદુ યત્ર ॥ ૯૫ ॥ (Megha 24c)
સભ્રૂભઙ્ગં મુખમિવ પયો વેત્રવત્યાશ્ચલોર્મિ ॥ ૯૬ ॥ (Megha 24d)
નીચૈરાખ્યં ગિરિમધિવસેસ્તત્ર વિશ્રાન્તિહેતોઃ ॥ ૯૭ ॥ (Megha 25a)
ત્વત્સમ્પર્કાત્પુલકિતમિવ પ્રૌઢપુષ્પૈઃ કદમ્બૈઃ ॥ ૯૮ ॥ (Megha 25b)
યઃ પણ્યસ્ત્રીરતિપરિમલોદ્ગારિભિર્નાગરાણામ્ ॥ ૯૯ ॥ (Megha 25c)
ઉદ્દામાનિ પ્રથયતિ શિલાવેશ્મભિર્યૌવનાનિ ॥ ૧૦૦ ॥ (Megha 25d)
વિશ્રાન્તઃ સન્વ્રજ વનનદીતીરજાનાં નિષિઞ્ચ- (Megha 26a)
ન્નુદ્યાનાનાં નવજલકણૈર્યૂથિકાજાલકાનિ ॥ ૧૦૧ ॥ (Megha 26b)
ગણ્ડસ્વેદાપનયનરુજાક્લાન્તકર્ણોત્પલાનાં (Megha 26c)
છાયાદાનાત્ક્ષણપરિચિતઃ પુષ્પલાવીમુખાનામ્ ॥ ૧૦૨ ॥ (Megha 26d)
વક્રઃ પન્થા યદપિ ભવતઃ પ્રસ્થિતસ્યોત્તરાશાં (Megha 27a)
સૌધોત્સઙ્ગપ્રણયવિમુખો મા સ્મ ભૂરુજ્જયિન્યાઃ ॥ ૧૦૩ ॥ (Megha 27b)
વિદ્યુદ્દામસ્ફુરિતચકિતૈર્યત્ર પૌરાઙ્ગનાનાં (Megha 27c)
લોલાપાઙ્ગૈર્યદિ ન રમસે લોચનૈર્વઞ્ચિતઃ સ્યાઃ ॥ ૧૦૪ ॥ (Megha 27d)
વીચિક્ષોભસ્તનિતવિહગશ્રેણિકાઞ્ચીગુણાયાઃ (Megha 28a)

સંસર્પન્ત્યાઃ સ્ખલિતસુભગં દર્શિતાવર્તનાભેઃ ॥ ૧૦૫॥ (Megha 28b)
નિર્વિન્ધ્યાયાઃ પથિ ભવ રસાભ્યન્તરઃ સન્નિપત્ય (Megha 28c)
સ્ત્રીણામાદ્યં પ્રણયવચનં વિભ્રમો હિ પ્રિયેષુ ॥ ૧૦૬॥ (Megha 28d)
વેણીભૂતપ્રતનુસલિલા તામતીતસ્ય સિન્ધુઃ (Megha 29a)
પાણ્ડુચ્છાયાતટરુહતરુભ્રંશિભિર્જીર્ણપર્ણૈઃ ॥ ૧૦૭॥ (Megha 29b)
સૌભાગ્યં તે સુભગ ! વિરહાવસ્થયા વ્યઞ્જયન્તી (Megha 29c)
કાર્શ્યં યેન ત્યજતિ વિધિના સ ત્વયૈવોપપાદ્યઃ ॥ ૧૦૮॥ (Megha 29d)
પ્રાપ્યાવન્તીનુદયનકથાકોવિદગ્રામવૃદ્ધાન્ (Megha 30a)
પૂર્વોદ્દિષ્ટામનુસર પુરીં શ્રીવિશાલાં વિશાલામ્ ॥ ૧૦૯॥ (Megha 30b)
સ્વલ્પીભૂતે સુચરિતફલે સ્વર્ગિણાં ગાં ગતાનાં (Megha 30c)
શેષૈઃ પુણ્યૈર્હૃતમિવ દિવઃ કાન્તિમત્ખણ્ડમેકમ્ ॥ ૧૧૦॥ (Megha 30d)
દીર્ઘીકુર્વન્પટુ મદકલં કૂજિતં સારસાનાં (Megha 31a)
પ્રત્યૂષેષુ સ્ફુટિતકમલામોદમૈત્રીકષાયઃ ॥ ૧૧૧॥ (Megha 31b)
યત્ર સ્ત્રીણાં હરતિ સુરતગ્લાનિમઙ્ગાનુકૂલઃ (Megha 31c)
શિપ્રાવાતઃ પ્રિયતમ ઇવ પ્રાર્થનાચાટુકારઃ ॥ ૧૧૨॥ (Megha 31d)
પ્રદ્યોતસ્ય પ્રિય ! દુહિતરં વત્સર્જોઽત્ર જહ્રે । (Megha 33a)
હૈમં તાલદ્રુમભવનમભૂદત્ર તસ્યૈવ રાજ્ઞ (Megha 33b)
અત્રોદ્ભ્રાન્તઃ કિલ નલગિરિઃ સ્તમ્ભમુત્પાટ્ય દર્પા- (Megha 33c)
દિત્યાગન્તૂન્ રમયતિ જનો યત્ર બન્ધૂનભિજ્ઞઃ ॥ ૧૧૪॥ (Megha 33d)
હારાંસ્તારાંસ્તરલગુટિકાન્કોટિશઃ શઙ્ખશુક્તીઃ (Megha 32a)
શષ્પશ્યામાન્મરકતમણીનુન્મયૂખપ્રરોહાન્ ॥ ૧૧૫॥ (Megha 32b)
દૃષ્ટ્વા યસ્યા વિપણિરચિતાન્વિદ્રુમાણાં ચ ભઙ્ગાન્ (Megha 32c)
સંલક્ષ્યન્તે સલિલનિધયસ્તોયમાત્રાવશેષાઃ ॥ ૧૧૬॥ (Megha 32d)
જાલોદ્ગીર્ણૈરુપચિતવપુઃ કેશસંસ્કારધૂપૈ- (Megha 34a)
ર્બન્ધુપ્રીત્યા ભવનશિખિભિર્દત્તનૃત્યોપહારઃ ॥ ૧૧૭॥ (Megha 34b)
હર્મ્યેષ્વસ્યાઃ કુસુમસુરભિષ્વધ્વખિન્નાન્તરાત્મા (Megha 34c)
નીત્વા ખેદં લલિતવનિતાપાદરાગાઙ્કિતેષુ ॥ ૧૧૮॥ (Megha 34d)
દ્ભર્તુઃ કણ્ઠચ્છવિરિતિ ગણૈઃ સાદરં વીક્ષ્યમાણઃ ॥ ૧ ॥ (Megha 35a)
પુણ્યં યાયાસ્ત્રિભુવનગુરોર્ધામ ચણ્ડીશ્વરસ્ય ॥ ૨ ॥ (Megha 35b)
ર્ધૂતોદ્યાનં કુવલયરજોગન્ધિભિર્ગન્ધવત્યાઃ ॥ ૩ ॥ (Megha 35c)
તોયક્રીડાનિરતયુવતિસ્નાનતિક્તૈર્મરુદ્ભિઃ ॥ ૪॥ (Megha 35d)
રપ્યન્યસ્મિઞ્જલધર ! મહાકાલમાસાદ્ય કાલે ॥ ૫ ॥ (Megha 36a)

સ્થાતવ્યં તે નયનવિષયં યાવદત્યેતિ ભાનુઃ ॥ ૬ ॥ (Megha 36b)
કુર્વન્ સન્ધ્યાબલિપટહતાં શૂલિનઃ શ્લાઘનીયામ્ ॥ ૭ ॥ (Megha 36c)
રામન્દ્રાણાં ફલમવિકલં લપ્સ્યસે ગર્જિતાનામ્ ॥ ૮॥ (Megha 36d)
પાદન્યાસક્વણિતરસનાસ્તત્ર લીલાવધૂતૈ ॥ ૯ ॥ (Megha 37a)
રત્નચ્છાયાખચિતવલિભિશ્ચામરૈઃ ક્લાન્તહસ્તાઃ ॥ ૧૦ ॥ (Megha 37b)
વેશ્યાસ્ત્વત્તો નખપદસુખાન્ પ્રાપ્ય વર્ષાગ્રબિન્દૂન્ ॥ ૧૧ ॥ (Megha 37c)
આમોક્ષ્યન્તે ત્વયિ મધુકરશ્રેણિદીર્ઘાન્ કટાક્ષાન્ ॥ ૧૨॥ (Megha 37d)
પશ્ચાદુચ્ચૈર્ભુજતરુવનં મણ્ડલેનાઽભિ લીનઃ ॥ ૧૩ ॥ (Megha 38a)
સાન્ધ્યં તેજઃ પ્રતિનવજપાપુષ્પરક્તં દધાનઃ ॥ ૧૪ ॥ (Megha 38b)
નૃત્યારમ્ભે હર પશુપતેરાર્દ્રનાગાજિનેચ્છામ્ ॥ ૧૫ ॥ (Megha 38c)
શાન્તોદ્વેગસ્તિમિતનયનં દૃષ્ટભક્તિર્ભવાન્યા ॥ ૧૬॥ (Megha 38d)
ગચ્છન્તીનાં રમણવસતિં યોષિતાં તત્ર નક્તમ્ ॥ ૧૭ ॥ (Megha 39a)
રુદ્ધાલોકે નરપતિપથે સૂચિભેદ્યૈસ્તમોભિઃ ॥ ૧૮ ॥ (Megha 39b)
સૌદામિન્યા કનકનિકષસ્નિગ્ધયા દર્શયોર્વીમ્ ॥ ૧૯ ॥ (Megha 39c)
તોયોત્સર્ગસ્તનિતમુખરો મા સ્મ ભૂર્વિક્લવાસ્તાઃ ॥ ૨૦॥ (Megha 39d)
તાં કસ્યાઞ્ચિદ્ભવનવલભૌ સુપ્તપારાવતાયા (Megha 40a)
નીત્વા રાત્રીં ચિરવિલસનાત્ ખિન્નવિદ્યુત્કલત્રઃ ॥ ૨૧॥ (Megha 40b)
દૃષ્ટે સૂર્યે પુનરપિ ભવાન્ વાહયેદધ્વશિષ્ટં (Megha 40c)
મન્દાયન્તે ન ખલુ સુહૃદામભ્યુપેતાર્થકૃત્યાઃ ॥ ૨૨॥ (Megha 340d)
તસ્મિન્કાલે નયનસલિલં યોષિતાં ખણ્ડિતાનાં (Megha 41a)
શાન્તિં નેયં પ્રણયિભિરતો વર્ત્મ ભાનોસ્ત્યજાશુ ॥ ૨૩॥ (Megha 41b)
પ્રાલેયાસ્રં કમલવદનાત્સોઽપિ હર્તું નલિન્યાઃ (Megha 41c)
પ્રત્યાવૃત્તસ્ત્વયિ કરરુધિ સ્યાદનલ્પાભ્યસૂયઃ ॥ ૨૪॥ (Megha 41d)
ગમ્ભીરાયાઃ પયસિ સરિતશ્ચેતસીવ પ્રસન્ને (Megha 42a)
છાયાત્માઽપિ પ્રકૃતિસુભગો લપ્સ્યતે તે પ્રવેશમ્ ॥ ૨૫॥ (Megha 42b)
તસ્માદસ્યાઃ કુમુદવિશદાન્યર્હસિ ત્વં ન ધૈર્યા- (Megha 42c)
ન્મોઘીકર્તું ચટુલશફરોદ્વર્તનપ્રેક્ષિતાનિ ॥ ૨૬॥ (Megha 42d)
તસ્યાઃ કિઞ્ચિત્કરધૃતમિવ પ્રાપ્તવાનીરશાખં (Megha 43a)
હૃત્વા નીલં સલિલવસનં મુક્તરોધોનિતમ્બમ્ ॥ ૨૭॥ (Megha 43b)
પ્રસ્થાનં તે કથમપિ સખે લમ્બમાનસ્ય ભાવિ (Megha 43c)
જ્ઞાતાસ્વાદો વિવૃતજઘના કો વિહાતું સમર્થઃ ॥ ૨૮॥ (Megha 43d)
ત્વન્નિષ્યન્દોચ્છ્વસિતવસુધાગન્ધસમ્પર્કરમ્યઃ (Megha 44a)

સ્રોતોરન્ધ્રધ્વનિતમધુરં દન્તિભિઃ પીયમાનઃ ॥ ૨૯॥ (Megha 44b)
નીચૈર્વાસ્યત્યુપજિગમિષોર્દેવ પૂર્વં ગિરિં તે (Megha 44c)
શીતો વાયુઃ પરિણમયિતા કાનનોદુમ્બરાણામ્ ॥ ૩૦॥ (Megha 44d)
તત્ર સ્કન્દં નિયતવસતિં પુષ્પમેઘીકૃતાત્મા (Megha 45a)
પુષ્પાસારૈઃ સ્નપયતુ ભવાન્વ્યોમગઙ્ગાજલાર્દ્રૈઃ ॥ ૩૧॥ (Megha 45b)
રક્ષાહેતોર્નવશશિભૃતા વાસવીનાં ચમૂના- (Megha 45c)
મત્યાદિત્યં હુતવહમુખે સંભૃતં તદ્ધિ તેજઃ ॥ ૩૨॥ (Megha 45d)
જ્યોતિર્લેખાવલયિ ગલિતં યસ્ય બર્હં ભવાની (Megha 46a)
પુત્રપ્રેમ્ણા કુવલયપદપ્રાપિ કર્ણે કરોતિ ॥ ૩૩॥ (Megha 46a)
ધૌતાપાઙ્ગં હરશશિરુચા પાવકેસ્તં મયૂરં (Megha 46c)
પશ્ચાદદ્રિગ્રહણગુરુભિર્ગર્જિતૈર્નર્તયેથાઃ ॥ ૩૪॥ (Megha 46d)
આરાધ્યૈનં શરવણભવં દેવમુલ્લઙ્ઘિતાધ્વા (Megha 47a)
સિદ્ધદ્વન્દ્વૈર્જલકણભયાદ્વીણિભિર્મુક્તમાર્ગઃ ॥ ૩૫॥ (Megha 47b)
વ્યાલમ્બેથાઃ સુરભિતનયાલમ્ભજાં માનયિષ્યન્ (Megha 47c)
સ્રોતોમૂર્ત્યા ભુવિ પરિણતાં રન્તિદેવસ્ય કીર્તિમ્ ॥ ૩૬॥ (Megha 47d)
ત્વય્યાદાતું જલમવનતે શાર્ઙ્ગિણો વર્ણચૌરે ॥ ૩૭॥ (Megha 48a)
તસ્યાઃ સિન્ધોઃ પૃથુમપિ તનું દૂરભાવાત્પ્રવાહમ્ ॥ ૩૮॥ (Megha 48b)
પ્રેક્ષિષ્યન્તે ગગનગતયો નૂનમાવર્જ્ય દૃષ્ટીઃ ॥ ૩૯॥ (Megha 48c)
એકં મુક્તાગુણમિવ ભુવઃ સ્થૂલમધ્યેન્દ્રનીલમ્ ॥ ૪૦॥ (Megha 48d)
તામુત્તીર્ય વ્રજ પરિચિતભ્રૂલતાવિભ્રમાણામ્ ॥ ૪૧॥ (Megha 49a)
પક્ષ્મોત્ક્ષેપાદુપરિવિલસત્કૃષ્ણશરપ્રભાણામ્ ॥ ૪૨॥ (Megha 49b)
કુન્દક્ષેપાનુગમધુકરશ્રીમુષામાત્મબિમ્બમ્ ॥ ૪૩॥ (Megha 49c)
પાત્રીકુર્વન્દશપુરવધૂનેત્રકૌતૂહલાનામ્ ॥ ૪૪॥ (Megha 49d)
બ્રહ્માવર્તં જનપદમથ ચ્છાયયા ગાહમાનઃ ॥ ૪૫॥ (Megha 50a)
ક્ષેત્રં ક્ષત્રપ્રધનપિશુનં કૌરવં તદ્ ભજેથાઃ ॥ ૪૬॥ (Megha 50b)
રાજન્યાનાં શિતશરશતૈર્યત્ર ગાણ્ડીવધન્વા (Megha 50c
ધારાપાતૈસ્ત્વમિવ કમલાન્યભ્યવર્ષન્મુખાનિ ॥ ૪૭॥ (Megha 50d)
હિત્વા હાલામભિમતરસાં રેવતીલોચનાङ्काम् ॥ ૪૮॥ (Megha 51a)
બન્ધુસ્નેહાત્સમરવિમુખો લાઙ્ગલી યાઃ સિષેવે ॥ ૪૯॥ (Megha 51b)
કૃત્વા તાસામભિગમમપાં સૌમ્ય સારસ્વતીનાં (Megha 51c)
અન્તઃશુદ્ધસ્ત્વમપિ ભવિતા વર્ણમાત્રેણ કૃષ્ણઃ ॥ ૫૦॥ (Megha 51d)
તસ્માદ્ગચ્છેરનુકનખલં શૈલરાજાવતીર્ણામ્ ॥ ૫૧॥ (Megha 52a)

જહ્નોઃ કન્યાં સગરતનયસ્વર્ગસોપાનપઙ્ક્તિમ્ ॥ ૫૨॥ (Megha 52b)
ગૌરી વક્ત્રભ્રુકુટિરચનાં યા વિહસ્યેવ ફેનૈઃ (Megha 52c)
શમ્ભોઃ કેશગ્રહણમકરોદિન્દુલગ્નોર્મિહસ્તા ॥ ૫૩॥ (Megha 52d)
તસ્યાઃ પાતું સુરગજ ઇવ વ્યોમ્નિ પૂર્વાર્ધલમ્બી ॥ ૫૪॥ (Megha 53a)
ત્વં ચેદચ્છસ્ફટિકવિશદં તર્કયેસ્તિર્યગમ્ભઃ ॥ ૫૫॥ (Megha 53b)
સંસર્પન્ત્યા સપદિ ભવતઃ સ્રોતસિ ચ્છાયયા સા (Megha 53c)
સ્યાદસ્થાનોપગતયમુનાસઙ્ગમેવાભિરામા ॥ ૫૬॥ (Megha 53d)
ન્નાસીનાનાં સુરભિતશિલં નાભિગન્ધૈર્મૃગાણામ્ ॥ ૫૭॥ (Megha 54a)
સ્તસ્યા એવ પ્રભવમચલં પ્રાપ્ય ગૌરં તુષારૈઃ ॥ ૫૮॥ (Megha 54b)
વક્ષ્યસ્યધ્વશ્રમવિનયને તસ્ય શ ૃઙ્ગે નિષણ્ણઃ (Megha 54c)
શોભાં શુભ્રત્રિનયનવૃષોત્ખાતપઙ્કોપમેયામ્ ॥ ૫૯॥ (Megha 54d)
તં ચેદ્વાયૌ સરતિ સરલસ્કન્ધસઙ્ઘટ્ટજન્મા ॥ ૬૦॥ (Megha 55a)
બાધેતોલ્કાક્ષપિતચમરીબાલભારો દવાગ્નિઃ ॥ ૬૧॥ (Megha 55b)
અર્હસ્યેનં શમયિતુમલં વારિધારાસહસ્રૈ- (Megha 55c)
રાપન્નાર્તિપ્રશમનફલાઃ સમ્પદો હ્યુત્તમાનામ્ ॥ ૬૨॥ (Megha 55d)
યે સંરમ્ભોત્પતનરભસાસ્સ્વાઙ્ગભઙ્ગાય તસ્મિન્ (Megha 56a)
મુક્તાધ્વાનં સપદિ શરભા લઙ્ઘયેયુર્ભવન્તમ્ ॥ ૬૩॥ (Megha 56b)
તાન્કુર્વીથાસ્તુમુલકરકાવૃષ્ટિહાસાવકીર્ણાન્ (Megha 56c)
કેષાં ન સ્યુઃ પરિભવપદં નિષ્ફલારમ્ભયત્નાઃ ॥ ૬૪॥ (Megha 56d)
તત્ર વ્યક્તં દૃષદિ ચરણન્યાસમર્ધેન્દુમૌલે- (Megha 57a)
શશ્વત્સિદ્ધૈરુપહૃતબલિં ભક્તિનમ્રઃ પરીયાઃ (Megha 57b)
યસ્મિન્દૃષ્ટે કરણવિગમાદૂર્ધ્વમુદ્ધૂતપાપાઃ (Megha 57c)
કલ્પિષ્યન્તે સ્થિરગણપદપ્રાપ્તયે શ્રદ્દધાનાઃ ॥ ૬૬॥ (Megha 57d)
શબ્દાયન્તે મધુરમનિલૈઃ કીચકાઃ પૂર્યમાણાઃ (Megha 58a)
સંરક્તાભિસ્ત્રિપુરવિજયો ગીયતે કિન્નરીભિઃ ॥ ૬૭॥ (Megha 58b)
નિર્હ્રાદી તે મુરવ ઇવ ચેત્કન્દરીષુ ધ્વનિઃ સ્યાત્ (Megha 58c)
સઙ્ગીતાર્થો નનુ પશુપતેસ્તત્ર ભાવી સમસ્તઃ ॥ ૬૮॥ (Megha 58d)
પ્રાલેયાદ્રેરુપતટમતિક્રમ્ય તાંસ્તાન્ વિશેષાન્ (Megha 59a)
હંસદ્વારં ભૃગુપતિયશોવર્ત્મ યત્ ક્રૌઞ્ચરન્ધ્રમ્ । (Megha 59b)
તેનોદીચીં દિશમનુસરેસ્તિર્યગાયામશોભી । (Megha 59c)
શ્યામઃ પાદો બલિનિયમનેઽભ્યુદ્યતસ્યેવ વિષ્ણોઃ ॥ ૭૦॥ (Megha 59d)
ગત્વા ચોર્ધ્વં દશમુખભુજોચ્છ્વાસિતપ્રસ્થસન્ધેઃ । (Megha 60a)

કૈલાસસ્ય ત્રિદશવનિતાદર્પણસ્યાતિથિઃ સ્યાઃ ॥ ૭૧ ॥ (Megha 60b)
શ‌ૃઙ્ગોચ્છ્રાયૈઃ કુમુદવિશદૈર્યો વિતત્ય સ્થિતઃ ખમ્ । (Megha 60c)
રાશીભૂતઃ પ્રતિદિનમિવ ત્ર્યમ્બકસ્યાટ્ટહાસઃ ॥ ૭૨ ॥ (Megha 60d)
ઉત્પશ્યામિ ત્વયિ તટગતે સ્નિગ્ધભિન્નાઞ્જનાભે (Megha 61a)
સદ્યઃકૃત્તદ્વિરદદશનચ્છેદગૌરસ્ય તસ્ય (Megha 61b)
લીલામદ્રેઃ સ્તિમિતનયનપ્રેક્ષણીયાં ભવિત્રી- (Megha 61c)
મંસન્યસ્તે સતિ હલભૃતો મેચકે વાસસીવ ॥ ૭૪ ॥ (Megha 61d)
તસ્મિન્હિત્વા ભુજગવલયં શમ્ભુના દત્તહસ્તા (Megha 62a)
ક્રીડાશૈલે યદિ ચ વિહરેત્પાદચારેણ ગૌરી (Megha 62b)
ભઙ્ગીભક્ત્યા વિરચિતવપુઃ સ્તમ્ભિતાન્તર્જલૌઘઃ (Megha 62c )
સોપાનં ત્વં કુરુ મણિતટારોહણાયાગ્રચારી ॥ ૭૬ ॥ (Megha 62d)
તત્રાવશ્યં વલયકુલિશોદ્ઘટ્ટનોદ્ગીર્ણતોયં (Megha 63a)
નેષ્યન્તિ ત્વાં સુરયુવતયો યન્ત્રધારાગૃહત્વમ્ ॥ ૭૭ ॥ (Megha 63b)
તાભ્યો મોક્ષો યદિ તવ સખે ઘર્મલબ્ધસ્ય ન સ્યાત્ (Megha 53c)
ક્રીડાલોલાઃ શ્રવણપરુષૈર્ગર્જિતૈર્ભીષયેસ્તાઃ ॥ ૭૮ ॥ (Megha 63d)
હેમામ્ભોજપ્રસવિ સલિલં માનસસ્યાઽઽદદાનઃ (Megha 64)
કુર્વન્કામં ક્ષણમુખપટપ્રીતિમૈરાવણસ્ય ॥ ૭૯ ॥ (Megha 64b)
ધુન્વન્કલ્પદ્રુમકિસલયાન્યંશુકાનિ સ્વવાતૈઃ(Megha 64c)
નાનાચેષ્ટૈર્જલદ લલિતૈર્નિર્વિશેસ્તં નગેન્દ્રમ્ ॥૮૦॥ (Megha 64d)
તસ્યોત્સઙ્ગે પ્રણયિન ઇવ સ્રસ્તગઙ્ગાદુકૂલામ્ ॥ ૮૧ ॥ (Megha 65a)
ન્ન ત્વં દૃષ્ટ્વા ન પુનરલકાં જ્ઞાસ્યસે કામચારિન્ ॥ ૮૨ ॥ (Megha 65b)
યા વઃ કાલે વહતિ સલિલોદ્ગારમુચ્ચૈર્વિમાના ॥ ૮૩ ॥ (Megha 65c)
મુક્તાજાલગ્રથિતમલકં કામિનીવાભ્રવૃન્દમ્ ॥ ૮૪ ॥ (Megha 65d)
વિદ્યુત્વન્તં લલિતવનિતાઃ સેન્દ્રચાપં સચિત્રાઃ ॥ ૮૫ ॥ (Megha 66a)
સઙ્ગીતાય પ્રહતમુરજાઃ સ્નિગ્ધપર્જન્યઘોષમ્ ॥ ૮૬ ॥ (Megha 66b)
મન્તસ્તોયં મણિમયભુવસ્તુઙ્ગમભ્રંલિહાગ્રાઃ ॥ ૮૭ ॥ (Megha 66c)
પ્રાસાદાસ્ત્વાં તુલયિતુમલં યત્ર તૈસ્તૈર્વિશેષૈઃ ॥ ૮૮ ॥ (Megha 66d)
યત્ર સ્ત્રીણાં પ્રિયતમભુજોચ્છ્વાસિતાલિઙ્ગિતાનામ્ ॥ ૮૯ ॥ (Megha 75a)
મઙ્ગગ્લાનિં સુરતજનિતાં તન્તુજાલાવલમ્બાઃ ॥ ૯૦ ॥ (Megha 75b)
સ્ત્વત્સંરોધાપગમવિશદૈશ્ચન્દ્રપાદૈર્નિશીથે ॥ ૯૧ ॥ (Megha 75c)
વ્યાલુમ્પન્તિ સ્ફુટજલલવસ્યન્દિનશ્ચન્દ્રકાન્તાઃ ॥ ૯૨ ॥ (Megha 75d)
ગત્યુત્કમ્પાદલકપતિતૈર્યત્ર મન્દારપુષ્પૈઃ ॥ ૯૩ ॥ (Megha 76a)

ક્લૃપ્તચ્છેદૈઃ કનકકમલૈઃ કર્ણવિભ્રંશિભિશ્ચ ॥ ૯૪॥ (Megha 76b)
મુક્તાજાલૈઃ સ્તનપરિસરચ્છિન્નસૂત્રૈશ્ચ હારૈઃ ॥ ૯૫॥ (Megha 76c)
નૈશો માર્ગઃ સવિતુરુદયે સૂચ્યતે કામિનીનામ્ ॥ ૯૬॥ (Megha 76d)
માનન્દોત્થં નયનસલિલં યત્ર નાઽન્યૈર્નિમિત્તૈઃ ॥ ૯૭॥ (Megha 70a)
ન્નાન્યસ્તાપઃ કુસુમશરજાદિષ્ટસંયોગસાધ્યાત્ ॥ ૯૮॥ (Megha 70b)
ન્નાપ્યન્યત્ર પ્રણયકલહાદ્વિપ્રયોગોપપત્તિઃ ॥ ૯૯॥ (Megha 70c)
વિત્તેશાનાં ન ચ ખલુ વયો યૌવનાદન્યદસ્તિ ॥ ૧૦૦॥ (Megha 70d)
યત્રોન્મત્તભ્રમરમુખરાઃ પાદપા નિત્યપુષ્પાઃ ॥ ૧૦૧॥ (Megha 69a)
હંસશ્રેણીરચિતરશના નિત્યપદ્મા નલિન્યઃ ॥ ૧૦૨॥ (Megha 69b)
કેકોત્કણ્ઠા ભવનશિખિનો નિત્યભાસ્વત્કલાપાઃ ॥ ૧૦૩॥ (Megha 69c)
ન્નિત્યજ્યોત્સ્નાપ્રતિહતતમોવૃત્તિરમ્યાઃ પ્રદોષાઃ ॥ ૧૦૪॥ (Megha 69d)
હસ્તે લીલાકમલમલકે બાલકુન્દાનુવિદ્ધમ્ ॥ ૧૦૫॥ (Megha 68a)
નીતા લોધ્રપ્રસવરજસા પાણ્ડુતામાનનશ્રીઃ ॥ ૧૦૬ ॥ (Megha 68b)
ચૂડાપાશે નવકુરબકં ચારુ કર્ણે શિરીષમ્ ॥ ૧૦૭ ॥ (Megha 68c)
સીમન્તે ચ ત્વદુપગમજં યત્ર નીપં વધૂનામ્ ॥ ૧૦૮ ॥ (Megha 68d)
યસ્યાં યક્ષાઃ સિતમણિમયાન્યેત્ય હર્મ્યસ્થલાનિ ॥ ૧૦૯ ॥ (Megha 71a)
જ્યોતિશ્છાયાકુસુમરચનાન્યુત્તમસ્ત્રીસહાયાઃ ॥ ૧૧૦ ॥ (Megha 71b)
માસેવન્તે મધુ રતિફલં કલ્પવૃક્ષપ્રસૂતમ્ ॥ ૧૧૧ ॥ (Megha 71c)
સ્ત્વદ્ગમ્ભીરધ્વનિષુ મધુરં પુષ્કરેષ્વાહતેષુ ॥ ૧૧૨ ॥ (Megha 71d)
નીવીબન્ધોચ્છ્વસિતશિથિલં યત્ર બિમ્બાધરાણામ્ ॥ ૧૧૩ ॥ (Megha 73a)
ક્ષૌમં રાગાદનિભૃતકરેષ્વાક્ષિપત્સુ પ્રિયેષુ ॥ ૧૧૪ ॥ (Megha 73b)
અર્ચિસ્તુઙ્ગાનભિમુખમપિ પ્રાપ્ય રત્નપ્રદીપાન્ ॥ ૧૧૫ ॥ (Megha 73c)
હ્રીમૂઢાનાં ભવતિ વિફલપ્રેરણા ચૂર્ણમુષ્ટિઃ ॥ ૧૧૬ ॥ (Megha 73d)
નેત્રા નીતાઃ સતતગતિના યદ્વિમાનાગ્રભૂમીઃ ॥ ૧૧૭ ॥ (Megha 74a)
આલેખ્યાનાં સ્વજલકણિકાદોષમુત્પાદ્ય સદ્યઃ ॥ ૧૧૮ ॥ (Megha 74b)
શઙ્કાસ્પૃષ્ટા ઇવ જલમુચસ્ત્વાદૃશા યત્ર જાલૈ- (Megha 74c)
ર્ધૂમોદ્ગારાનુકૃતિનિપુણા જર્જરા નિષ્પતન્તિ ॥ ૧॥ (Megha 74d)
મન્દાકિન્યાઃ સલિલશિશિરૈઃ સેવ્યમાના મરુદ્ભિઃ (Megha 72a)
મન્દારાણાં તટવનરુહાં છાયયા વારિતોષ્ણાઃ ॥ ૨॥ (Megha 72b)
અન્વેષ્ટવ્યૈઃ કનકસિકતમુષ્ટિનિક્ષેપગૂઢૈઃ (Megha 72c)
સઙ્ક્રીડન્તે મણિભિરમરપ્રાર્થિતા યત્ર કન્યાઃ ॥ ૩॥ (Megha 72d)
અક્ષય્યાન્તર્ભવનનિધયઃ પ્રત્યહં રક્તકણ્ઠૈ- (Megha 77a)

રુદ્ગાયદ્ભિર્ધનપતિયશઃ કિન્નરૈર્યત્ર સાર્ધમ્ ॥ ૪॥ (Megha 77b)
વૈભ્રાજાખ્યં વિબુધવનિતાવારમુખ્યાસહાયાઃ (Megha 77c)
બદ્ધાલાપા બહિરુપવનં કામિનો નિર્વિશન્તિ ॥ ૫ ॥ (Megha 77d)
વાસશ્ચિત્રં મધુ નયનયોર્વિભ્રમાદેશદક્ષં (Megha 78a)
પુષ્પોદ્ભેદં સહ કિસલયૈર્ભૂષણાનં વિકલ્પમ્ ॥ ૬ ॥ (Megha 78b)
લાક્ષારાગં ચરણકમલન્યાસયોગ્યં ચ યસ્મિન્ (Megha 78c) var યસ્યાં
એકઃ સૂતે સકલમબલામણ્ડનં કલ્પવૃક્ષઃ ॥ ૭ ॥ (Megha 78d)
પત્રશ્યામા દિનકરહયસ્પર્ધિનો યત્ર વાહાઃ (Megha 67a)
શૈલોદગ્રાસ્ત્વમિવ કરિણો વૃષ્ટિમન્તઃ પ્રભેદાત્ ॥ ૮॥ (Megha 67b )
યોધાગ્રણ્યઃ પ્રતિદશમુખં સંયુગે તસ્થિવાંસઃ (Megha 67c)
પ્રત્યાદિષ્ટાભરણરુચયશ્ચન્દ્રહાસવ્રણાઙ્કૈઃ ॥ ૯॥ (Megha 67d)
મત્વા દેવં ધનપતિસખં યત્ર સાક્ષાદ્વસન્તં (Megha 79a)
પ્રાયશ્ચાપં ન વહતિ ભયાન્મન્મથઃ ષટ્પદજ્યમ્ ॥ ૧૦॥ (Megha 79b)
સભ્રૂભઙ્ગપ્રહિતનયનૈઃ કામિલક્ષ્યેષ્વમોઘૈ- (Megha 79c)
સ્તસ્યાઽઽરમ્ભશ્ચતુરવનિતાવિભ્રમૈરેવ સિદ્ધઃ ॥ ૧૧॥ (Megha 79d)
તત્રાગારં ધનપતિગૃહાનુત્તરેણાઽસ્મદીયં (Megha 80a)
દૂરાલ્લક્ષ્યં સુરપતિધનુશ્ચારુણા તોરણેન ॥ ૧૨॥ (Megha 80b)
યસ્યોદ્યાને કૃતકતનયો વર્દ્ધિતઃ કાન્તયા મે (Megha 80c)
હસ્તપ્રાપ્યસ્તબકનમિતો બાલમન્દારવૃક્ષઃ ॥ ૧૩॥ (Megha 80d)
વાપી ચાઽસ્મિન્મરકતશિલાબદ્ધસોપાનમાર્ગા (Megha 81a)
હૈમૈઃ સ્ફીતા વિકચકમલૈર્દીર્ઘવૈદૂર્યનાલૈઃ ॥ ૧૪॥ (Megha 81b)
તસ્યાસ્તોયે કૃતવસતયો માનસં સન્નિકૃષ્ટં (Megha 81c)
નાધ્યાસ્યન્તિ વ્યપગતશુચસ્ત્વામપિ પ્રેક્ષ્ય હંસાઃ ॥ ૧૫॥ (Megha 81d)
તસ્યાસ્તીરે વિહિશિખરઃ પેશલૈરિન્દ્રનીલૈઃ (Megha 82a)
ક્રીડાશૈલઃ કનકકદલીવેષ્ટનપ્રેક્ષણીયઃ ॥ ૧૬॥ (Megha 82b)
મદ્ગેહિન્યા પ્રિય ઇતિ સખે ચેતસા કાતરેણ (Megha 82c)
પ્રેક્ષ્યોપાન્તસ્ફુરિતતડિતં ત્વાં તમેવ સ્મરામિ ॥ ૧૭॥ (Megha 82d)
તન્વી શ્યામા શિખરદશના પક્કબિમ્બાધરોષ્ઠી ॥ ૧૮॥ (Megha 87a)
મધ્યે ક્ષામા ચકિતહરિણીપ્રેક્ષણા નિમ્નનાભિઃ ॥ ૧૯॥ (Megha 87b)
શ્રોણીભારાદલસગમના સ્તોકનમ્રા સ્તનાભ્યામ્ ॥ ૨૦॥ (Megha 87c)
યા તત્ર સ્યાદ્યુવતિવિષયા સૃષ્ટિરાદ્યેવ ધાતુઃ ॥ ૨૧॥ (Megha 87d)
તાં જાનીયાઃ પરિમિતકથાં જીવિતં મે દ્વિતીયમ્ ॥ ૨૨॥ (Megha 88a)

દૂરીભૂતે મયિ સહચરે ચક્રવાકીમિવૈકામ્ ॥ ૨૩॥ (Megha 88b)
ગાઢોત્કણ્ઠાગુરુષુ દિવસેષ્વેષુ ગચ્છત્સુ બાલા ॥ ૨૪॥ (Megha 88c)
જાતા મન્યે શિશિરમથિતાં પદ્મિનીવાન્યરૂપા ॥ ૨૫॥ (Megha 88d)
નૂનં તસ્યાઃ પ્રબલરુદિતોચ્છૂનનેત્રં બહૂનાં (Megha 89a)
નિશ્વાસાનામશિશિરતયા ભિન્નવર્ણાધરોષ્ઠમ્ ॥ ૨૬॥ (Megha 89b)
હસ્તન્યસ્તં મુખમસકલવ્યક્તિ લમ્બાલકત્વા- (Megha 89c)
દિન્દોર્દૈન્યં ત્વદુપસરણક્લિષ્ટકાન્તેર્બિભર્તિ ॥ ૨૭॥ (Megha 89d)
રક્તાશોકશ્ચલકિસલયઃ કેસરશ્ચાત્ર કાન્તઃ (Megha 83a)
પ્રત્યાસન્નૌ કુરબકવૃતેર્માધવીમણ્ડપસ્ય ॥ ૨૮॥ (Megha 83b)
એકઃ સખ્યાસ્તવ સહ મયા વામપાદાભિલાષી (Megha 83c)
કાઙ્ક્ષત્યન્યો વદનમદિરાં દોહદચ્છદ્મનાઽસ્યાઃ ॥ ૨૯॥ (Megha 83d)
તન્મધ્યે ચ સ્ફટિકફલકા કાઞ્ચની વાસયષ્ટિ- (Megha 84a)
ર્મૂલે બદ્ધા મણિભિરનતિપ્રૌઢવંશપ્રકાશૈઃ ॥ ૩૦॥ (Megha 84b)
તાલૈઃ શિઞ્જાવલયસુભગૈઃ કાન્તયા નર્તિતો મે (Megha 84c)
યામધ્યાસ્તે દિવસવિગમે નીલકણ્ઠઃ સુહૃદ્વઃ ॥ ૩૧॥ (Megha 84d)
એભિઃ સાધો હૃદયનિહિતૈર્લક્ષણૈર્લક્ષયેથાઃ (Megha 85a)
દ્વારોપાન્તે લિખિતવપુષૌ શઙ્ખપદ્મૌ ચ દૃષ્ટ્વા ॥ ૩૨॥ (Megha 85b)
ક્ષામચ્છાયં ભવનમધુના મદ્વિયોગેન નૂનં (Megha 85c)
સૂર્યાપાયે ન ખલુ કમલં પુષ્યતિ સ્વામભિખ્યામ્ ॥ ૩૩॥ (Megha 85d)
ગત્વા સદ્યઃ કલભતનુતા શીઘ્રસમ્પાતહેતોઃ (Megha 86a)
ક્રીડાશૈલે પ્રથમકથિતે રમ્યસાનૌ નિષણ્ણઃ ॥ ૩૪॥ (Megha 86b)
અર્હસ્યન્તર્ભવનપતિતાં કર્તુમલ્પાલ્પભાસં (Megha 86c)
ખદ્યોતાલીવિલસિતનિભાં વિદ્યુદુન્મેષદૃષ્ટિમ્ ॥ ૩૫॥ (Megha 86d)
આલોકે તે નિપતતિ પુરા સા બલિવ્યાકુલા વા (Megha 90a)
મત્સાદૃશ્યં વિરહતનુ વા ભાવગમ્યં લિખન્તી ॥ ૩૭॥ (Megha 90b)
પૃચ્છન્તી વા મધુરવચનાં સારિકાં પઞ્જરસ્થાં (Megha 90c)
કચ્ચિત્ભર્તુઃ સ્મરસિ રસિકે ત્વં હિ તસ્ય પ્રિયેતિ ॥ ૩૭॥ (Megha 90d)
ઉત્સઙ્ગે વા મલિનવસને સૌમ્ય નિક્ષિપ્ય વીણાં (Megha 91a)
મદ્ગોત્રાઙ્કં વિરચિતપદં ગેયમુદ્ગાતુકામા । (Megha 91b)
તન્ત્રીરાર્દ્રાં નયનસલિલૈઃ સારયિત્વા કથઞ્ચિત્ (Megha 91c)
ભૂયો ભૂયઃ સ્વયમપિ કૃતાં મૂર્ચ્છનાં વિસ્મરન્તી ॥ ૩૯॥ (Megha 91d)
શેષાન્માસાન્ વિરહદિવસસ્થાપિતસ્યાઽવધેર્વા (Megha 92a)

વિન્યસ્યન્તી ભુવિ ગણનયા દેહલીમુક્તપુષ્પૈઃ (Megha 92b)
સમ્ભોગં વા હૃદયનિહિતારમ્ભમાસ્વાદયન્તી । (Megha 92c)
પ્રાયેણૈતે રમણવિરહેષ્વઙ્ગનાનાં વિનોદાઃ ॥ ૪૧॥ (Megha 92d)
સવ્યાપારામહનિ ન તથા પીડયેદ્વિપ્રયોગઃ । (Megha 93a)
શઙ્કે રાત્રૌ ગુરુતરશુચં નિર્વિનોદાં સખીં તે ॥ ૪૨॥ (Megha 93b)
મત્સન્દેશૈઃ સુખયિતુમતઃ પશ્ય સાધ્વીં નિશીથે । (Megha 93c)
તામુન્નિદ્રામવનિશયનાં સૌધવાતાયનસ્થઃ ॥ ૪૩॥ (Megha 93d)
માધિક્ષામાં વિરહશયને સન્નિષણ્ણૈકપાર્શ્વામ્ । (Megha 94a)
પ્રાચીમૂલે તનુમિવ કલામાત્રશેષાં હિમાંશોઃ ॥ ૪૪॥ (Megha 94b)
નીતા રાત્રિઃ ક્ષણ ઇવ મયા સાર્ધમિચ્છારતૈર્યા । (Megha 94c)
સ્તામેવોષ્ણૈર્વિરહમહતીમશ્રુભિર્યાપયન્તીમ્ ॥ ૪૫॥ (Megha 94d)
નિઃશ્વાસેનાऽધરકિસલયક્લેશિના વિક્ષિપન્તીમ્ । (Megha 96a)
શુદ્ધસ્નાનાત્ પરુષમલકં નૂનમાગણ્ડલમ્બં (Megha 96b)
મત્સમ્યોગઃ કથમુપનમેત્ સ્વપ્નજોऽપીતિ નિદ્રા- (Megha 96c)
માકાઙ્ક્ષન્તીં નયનસલિલોત્પીડરુદ્ધાવકાશામ્ ॥ ૪૭॥ (Megha 96d)
આદ્યે બદ્ધા વિરહદિવસે યા શિખા દામ હિત્વા (Megha 97a)
શાપસ્યાऽન્તે વિગલિતશુચા તાં મયોદ્વેષ્ટનીયાં (Megha 97b)
સ્પર્શક્લિષ્ટામયમિતનખેનાऽસકૃત્સારયન્તીં (Megha 97c)
ગણ્ડાભોગાત્કઠિનવિષમામેકવેણીં કરેણ ॥ ૪૯॥ (Megha 97d)
પાદાનિન્દોરમૃતશિશિરાઞ્જાલમાર્ગપ્રવિષ્ટા- (Megha 95a)
પૂર્વપ્રીત્યા ગતમભિમુખં સન્નિવૃત્તં તથૈવ (Megha 95b)
ખેદાચ્ચક્ષુઃ સલિલગુરુભિઃ પક્ષ્મભિશ્છાદયન્તીં (Megha 95c)
સાભ્રેऽહ્નીવ સ્થલકમલિનીં નપ્રબુદ્ધાં નસુપ્તામ્ ॥ ૫૧॥ (Megha 95d)
સા સન્યસ્તાભરણમબલા પેલવં ધારયન્તી (Megha 98a)
શય્યોત્સઙ્ગે નિહિતમસકૃદ્ દુઃખદુઃખેન ગાત્રં (Megha 98b)
ત્વામપ્યસ્રં નવજલમયં મોચયિષ્યત્યવશ્યં (Megha 98c)
પ્રાયઃ સર્વો ભવતિ કરુણાવૃત્તિરાર્દ્રાન્તરાત્મા ॥ ૫૩॥ (Megha 98d)
જાને સખ્યાસ્તવ મયિ મનઃ સંભૃતસ્નેહમસ્માત્ । (Megha 99a)
દિત્થમ્ભૂતાં પ્રથમવિરહે તામહં તર્કયામિ ॥ ૫૪॥ (Megha 99b)
વાચાલં માં ન ખલુ સુભગમ્મન્યભાવઃ કરોતિ (Megha 99c)
પ્રત્યક્ષં તે નિખિલમચિરાદ્ભ્રાતરુક્તં મયા યત્ ॥ ૫૫॥ (Megha 99d)
રુદ્ધાપાઙ્ગપ્રસરમલકૈરઞ્જનસ્નેહશૂન્યં (Megha 100a)

પ્રત્યાદેશાદપિ ચ મધુનો વિસ્મૃતભ્રૂવિલાસમ્ ॥ ૫૬॥ (Megha 100b)
ત્વય્યાસન્ને નયનમુપરિસ્પન્દિ શઙ્કે મૃગાક્ષ્યા (Megha 100c)
મીનક્ષોભાચ્ચલકુવલયશ્રીતુલામેષ્યતીતિ ॥ ૫૭॥ (Megha 100d)
વામશ્ચાસ્યાઃ કરરુહપદૈર્મુચ્યમાનો મદીયૈઃ ॥ ૧॥ (Megha 101a)
મુક્તાજાલં ચિરપરિચિતં ત્યાજિતો દૈવગત્યા ॥ ૨॥ (Megha 101b)
સમ્ભોગાન્તે મમ સમુચિતો હસ્તસંવાહનાનામ્ ॥ ૩॥ (Megha 101c)
યાસ્યત્યૂરુઃ સરસકદલીસ્તમ્ભગૌરશ્ચલત્વમ્ ॥ ૪॥ (Megha 101d)
તસ્મિન્કાલે જલદ યદિ સા લબ્ધનિદ્રાસુખા સ્યાત્ ॥ ૫॥ (Megha 102a)
ન્વાસ્યૈનાં સ્તનિતવિમુખો યામમાત્રં સહસ્વ ॥ ૬॥ (Megha 102b)
મા ભૂદસ્યાઃ પ્રણયિનિ જને સ્વપ્નલબ્ધે કથઞ્ચિત્ ॥ ૭॥ (Megha 102c)
સદ્યઃ કણ્ઠચ્યુતભુજલતાગ્રન્થિ ગાઢોપગૂઢમ્ ॥ ૮॥ (Megha 102d)
પ્રોત્થાપ્યૈનાં સ્વજલકણિકાશીતલેનાઽનિલેન ॥ ૯॥ (Megha 103a)
પ્રત્યાશ્વસ્તાં સમમભિનવૈર્જાલકૈર્માલતીનામ્ ॥ ૧૦॥ (Megha 103b)
વિદ્યુદ્ગર્ભઃ સ્તિમિતનયનાં ત્વત્સનાથે ગવાક્ષે ॥ ૧૧॥ (Megha 103c)
વક્તું ધીરં સ્તનિતવચનો માનિનીં પ્રક્રમેથાઃ ॥ ૧૨॥(Megha 103d)
ભર્તુર્મિત્રં પ્રિયમભિદધે વિદ્ધિ મામમ્બુવાહમ્ ॥ ૧૩॥(Megha 104a)
તત્સન્દેશૈર્મનસિ નિહિતૈરાગતં ત્વત્સમીપમ્ ॥ ૧૪(Megha 104b)
યો વૃન્દાનિ ત્વરયતિ પથિ શ્રામ્યતાં પ્રોષિતાનામ્ ॥ ૧૫॥ (Megha 104c)
મન્દ્રસ્નિગ્ધૈર્ધ્વનિભિરબલાવેણિમોક્ષોત્સુકાનિ ॥ ૧૬॥ (Megha 104d)
દિત્યાખ્યાતે પવનતનયં મૈથિલીવોન્મુખી સા ॥ ૧૭॥ (Megha 105a)
ત્વામુત્કણ્ઠોચ્છ્વસિતહૃદયા વીક્ષ્ય સમ્ભાવ્ય ચૈવ ॥ ૧૮॥ (Megha 105b)
શ્રોષ્યત્યસ્માત્પરમવહિતં સૌમ્ય સીમન્તિનીનામ્ ॥ ૧૯॥ (Megha 105c)
કાન્તોપાન્તાત્સુહૃદુપગમઃ સઙ્ગમાત્કિઞ્ચિદૂનઃ ॥ ૨૦॥ (Megha 105d)
તામાયુષ્મન્મમ ચ વચનાદાત્મનશ્ચોપકર્તુમ્ ॥ ૨૧॥ (Megha 106a)
બ્રૂયાદેવં તવ સહચરો રામગિર્યાશ્રમસ્થઃ ॥ ૨૨॥ (Megha 106b)
અવ્યાપન્નઃ કુશલમબલે પૃચ્છતિ ત્વાં વિયુક્તઃ ॥ ૨૩॥ (Megha 106c)
પૂર્વાશાસ્યં સુલભવિપદાં પ્રાણિનામેતદેવ ॥ ૨૪॥ (Megha 106d)
અઙ્ગેનાઙ્ગં તનુ ચ તનુના ગાઢતપ્તેન તપ્તં (Megha 107a)
સાસ્રેણાસ્રદ્રવમવિરતોત્કણ્ઠમુત્કણ્ઠિતેન ॥ ૨૫॥ (Megha 107b)
ઉષ્ણોચ્છ્વાસં સમધિકતરોચ્છ્વાસિના દૂરવર્તી (Megha 107c)
સઙ્કલ્પૈસ્તૈર્વિશતિ વિધિના વૈરિણા રુદ્ધમાર્ગઃ ॥ ૨૬॥ (Megha 107d)
શબ્દાખ્યેયં યદપિ કિલ તે યઃ સખીનાં પુરસ્તાત્ (Megha 108a)

કર્ણે લોલઃ કથયિતુમભૂદાનનસ્પર્શલોભાત્ ॥ ૨૭॥ (Megha 108b)
સોઽતિક્રાન્તઃ શ્રવણવિષયં લોચનાભ્યામદૃષ્ટ- (Megha 108c)
સ્ત્વામુત્કણ્ઠાવિરચિતપદં મન્મુખેનેદમાહ ॥ ૨૮॥ (Megha 108d)
શ્યામાસ્વઙ્ગં ચકિતહરિણીપ્રેક્ષણે દૃષ્ટિપાતં (Megha 109a)
વક્ત્રચ્છાયા શશિનિ શિખિનાં બર્હભારેષુ કેશાન્ ॥ ૨૯॥ (Megha 109b)
મુત્પશ્યામિ પ્રતનુષુ નદીવીચિષુ ભ્રૂવિલાસાન્ ॥ ૩૦॥ (Megha 109c)
હન્તૈકસ્થં ક્વચિદપિ ન તે ચણ્ડિ સાદૃશ્યમસ્તિ ॥ ૩૧॥ (Megha 109d)
ત્વામાલિખ્ય પ્રણયકુપિતાં ધાતુરાગૈઃ શિલાયામ્ ॥ ૩૨॥(Megha 110a)
આત્માનં તે ચરણપતિતં યાવદિચ્છામિ કર્તુમ્ ॥ ૩૩॥ (Megha 110b)
રસ્રૈસ્તાવન્મુહુરુપચિતૈર્દૃષ્ટિરાલુપ્યતે મે ॥ ૩૪॥ (Megha 110c)
ક્રૂરસ્તસ્મિન્નપિ ન સહતે સઙ્ગમં નૌ કૃતાન્તઃ ॥ ૩૫॥ (Megha 110d)
મામાકાશપ્રણિહિતભુજં નિર્દયાશ્લેષહેતો- (Megha 111a)
ર્લબ્ધાયાસ્તે કથમપિ મયા સ્વપ્નસન્દર્શનેષુ (Megha 111b)
પશ્યન્તીનાં ન ખલુ બહુશો ન સ્થલીદેવતાનાં (Megha 111c)
મુક્તાસ્થૂલાસ્તરુકિસલયેષ્વશ્રુલેશાઃ પતન્તિ ॥ ૩૮॥ (Megha 111d)
સઙ્ક્ષિપ્યેત ક્ષણમિવ કથં દીર્ઘયામા ત્રિયામા (Megha 113a)
સર્વાવસ્થાસ્વહરપિ કથં મન્દમન્દાતપં સ્યાત્ । (Megha 113b)
ઇત્થં ચેતશ્ચટુલનયને દુર્લભપ્રાર્થનં મે (Megha 113c)
ગાઢોષ્ણાભિઃ કૃતમશરણં ત્વદ્વિયોગવ્યથાભિઃ ॥ ૪૧॥ (Megha 113d)
ભિત્ત્વા સદ્યઃ કિસલયપુટાન્દેવદારુદ્રુમાણાં (Megha 112a)
યે તત્ક્ષીરસ્રુતિસુરભયો દક્ષિણેન પ્રવૃત્તાઃ ॥ ૪૨॥ (Megha 112b)
આલિઙ્ગ્યન્તે ગુણવતિ મયા તે તુષારાદ્રિવાતાઃ (Megha 112c)
પૂર્વં સ્પૃષ્ટં યદિ કિલ ભવેદઙ્ગમેભિસ્તવેતિ ॥ ૪૩॥ (Megha 112d)
નન્વાત્માનં બહુ વિગણયન્નાત્મનૈવાઽવલમ્બે (Megha 114a)
તત્કલ્યાણિ ત્વમપિ નિતરાં મા ગમઃ કાતરત્વમ્ ॥ ૪૪॥ (Megha 114b)
કસ્યૈકાન્તં સુખમુપનતં દુઃખમેકાન્તતો વા (Megha 114c)
નીચૈર્ગચ્છત્યુપરિ ચ દશા ચક્રનેમિક્રમેણ ॥ ૪૫॥ (Megha 114d)
શાપાન્તો મે ભુજગશયનાદુત્થિતે શાર્ઙ્ગપાણૌ ॥ ૪૬॥ (Megha 115a)
માસાનન્યાન્ગમય ચતુરો લોચને મીલયિત્વા ॥ ૪૭॥ (Megha 115b)
પશ્ચાદાવાં વિરહગુણિતં તં તમાત્માભિલાષં (Megha 115c)
નિર્વેક્ષ્યાવઃ પરિણતશરચ્ચન્દ્રિકાસુ ક્ષપાસુ ॥ ૪૮॥ (Megha 115d)
ભૂયશ્ચાહ ત્વમપિ શયને કણ્ઠલગ્ના પુરા મે (Megha 116a)

નિદ્રાં ગત્વા કિમપિ રુદતી સસ્વનં વિપ્રબુદ્ધા ॥ ૪૯ ॥ (Megha 116b)
સાન્તર્હાસં કથિતમસકૃત્પૃચ્છતોऽસિ ત્વયા મે (Megha 116c)
દૃષ્ટઃ સ્વપ્ને કિતવ રમયન્કામપિ ત્વં મયેતિ ॥ ૫૦ ॥ (Megha 116d)
દેતસ્માન્માં કુશલિનમભિજ્ઞાનદાનાદ્વિદિત્વા ॥ ૫૧ ॥ (Megha 117a)
મા કૌલીનાદસિતનયને મય્યવિશ્વાસિની ભૂઃ ॥ ૫૨ ॥ (Megha 117b)
સ્નેહાનાહુઃ કિમપિ વિરહે હ્રાસિનસ્તેऽપ્યભોગા- (Megha 117c)
દિષ્ટે વસ્તુન્યુપચિતરસાઃ પ્રેમરાશીભવન્તિ ॥ ૫૩ ॥ (Megha 117d)
માશ્વાસ્યૈનાં પ્રથમવિરહે શોકદષ્ટં સખીં તે ॥ ૫૪(Megha 118a)
તસ્માદદ્રેસ્ત્રિનયનવૃષોત્ખાતકૂટાન્નિવૃત્તઃ ॥ ૫૫ ॥(Megha 118b)
સાભિજ્ઞાનં પ્રહિતવચનૈસ્તત્ર યુક્તૈર્મમાऽપિ ॥ ૫૬ ॥ (Megha 118c) var
પ્રાતઃ કુન્દપ્રસવશિથિલં જીવિતં ધારયેદમ્ ॥ ૫૭ ॥ (Megha 118d)
કચ્ચિત્સોમ્ય વ્યવસિતમિદં બન્ધુકૃત્યં ત્વયા મે ॥ ૫૮ ॥ (Megha 119a)
પ્રત્યાદેશાન્ન ખલુ ભવતો ધીરતાં કલ્પયામિ ॥ ૫૯ ॥ (Megha 119b)
નિઃશબ્દોऽપિ પ્રદિશસિ જલં યાચિતશ્ચાતકેભ્યઃ ॥ ૬૦ ॥ (Megha 119c)
પ્રત્યુક્તં હિ પ્રણયિષુ સતામીપ્સિતાર્થક્રિયૈવ ॥ ૬૧ ॥ (Megha 119d)
એતત્કૃત્વા પ્રિયમનુચિતં પ્રાર્થનાદાત્મનો મે ॥ ૬૨ ॥ (Megha 120a)
સૌહર્દાદ્વા વિધુર ઇતિ વા મય્યનુક્રોશબુદ્ધ્યા ॥ ૬૩ ॥ (Megha 120b)
ન્નિષ્ટાન્દેશાન્વિચર જલદ પ્રાવૃષા સંભૃતશ્રીઃ ॥ ૬૪ ॥ (Megha 120c)
મા ભૂદેવં ક્ષણમપિ ચ તે વિદ્યુતા વિપ્રયોગઃ ॥ ૬૫ ॥ (Megha 120d)

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*pArshvAbhyudayam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*